R S V L
00987
178/XXI
987

987

Registered No. M 2300.

Book XXI ॥ श्रीः ॥ Nos. 1, 2, 3 & 4

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥


| | | |
|---|---|---|
| पु. २१] कलि ५०४८ सर्वजित | कन्या<br>वृश्चिक | साधारण सं १,३ |
| | तुला<br>धनुः | शास्त्रानुबन्धः सं२,४<br>आहत्य ,, ४ |


# THE UDYANA PATRIKA.

A

SANSKRIT MONTHLY

September October November December 47

## विषयाः ॥

A20

शास्त्रानुबन्धः—

कुवलयानन्दः । [बुधरञ्जनीसमेतः] २२१—२२८

1 मेनका ।
2 सुभाषितनीवी ।
3 भाषा ।
4 परिपन्थिशब्दः ।
5 भास्करप्रणामः ।
6 यथाभिमतम् [नाटकम्]
7 पाठशुद्धिविमर्शः ।
8 पुस्तकपरामर्शः । &
9 प्रतिबोधनम् [in the wrapper]

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।
२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।
३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।
५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः।
७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण)।
८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Tiruvadi P.O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava, Mimamsakesari Panditaraja* **D. T. Tatacharya Siromani M. O. L.**
Lecturer, Sri Venkateswara College,
TIRUPATI.

प्रतिबोधनम् । (2)

द्वेष एवोपसदनं गर्हणैव च दक्षिणा ।
987
द्वाभ्यामाभ्यां वयं तुष्टा दिशामस्तत्त्वनिर्णयम् ॥

4 "परदु खदुःखित्वमिति पदप्रयोक्ता यः तस्य कीदृशी विवक्षा' इति विमर्शनीयम् ।"

सत्यम् । को नेत्याह । 'बहु स्यां प्रजायेयेति च । पृथगभिमानित्वे हि न बहुस्यामिति स्यात् । अत एव तत्फलभोगेन हर्षशोकादिभिर्विकुर्वाणः.... । एवं सर्वेषां ज्ञानायतनभोगतदुपकरणस्वरूपेषु तदभिन्नतन्त्रात्मके महागुणे....'

[ராப்பர் 3-ம் பக்கம் பார்க்கவும்]

मान्त्रिकः—अस्ति आर्यः ?

अम्बा— नास्ति । कस्त्वम् ?

मान्त्रिकः— अहं नैनामहम्मदप्रभोः सकाशादागतोऽस्मि । स किल चतुर्भ्यो दिनेभ्यः पूर्वं आर्यमानेतुं कञ्चन पुरुषं प्रैषयत् । यूयं किल मैलापुरप्रासादक्रयणाय आर्यो नागपट्टणं गत इत्यवोचत । किमिदानीं स आगतः ? किं प्रासादमक्रीणात् ? इत्येतत् ज्ञात्वाऽऽगच्छेति प्रभुः मां प्रेषयति स्म ।

तदाकर्णितवती अम्बा पर्यालोचनमकृत्वा सहसा 'वित्तं किल सर्वं धूमशकटे चोरितमभूत् । न प्रासादमक्रीणात् । प्रतिनिवृत्तः ।' इति खिन्ना बभाषे ।

मान्त्रिकः महान्तं विस्मयं दर्शयित्वा 'किमाश्चर्यम् । चोरितं नु अभूत् । कति रूप्याणि गतानि' इत्यब्रवीत् ।

मीनाक्षी—दश सहस्राणि रूप्याणि गतानि । आर्यः किल धूमशकटमारुह्य मायवरात् तिरुवारूर् अगच्छत् । मार्गे किल किञ्चित् सुष्वाप । ये केचन मूतमपजहुः ।

मान्त्रिकः—अरे रे, तावन्नु वित्तं गतम् ? स्वामी यदि शृणुयात् बहु विषीदेत् । अद्य आर्यः किमन्तरास्ते ?

मीनाक्षी—न । उपपुस्तकयितुः कार्यालयमगमत् । इतः एकया नाड्या आगतो भवेत् । तत्र वेद्यामुपविष्टो भवतु भवान् ।

मान्त्रिकः—न मे उपवेष्टुं समयोऽस्ति । किं शीघ्रमागच्छेत् । अथवा कालो भवेत् । किं कस्यापि साक्ष्यं वक्तुमगमत् ? अथ वा केन कार्यान्तरेणागमत् ?

मीनाक्षी—प्रासादक्रयणविषयेणैव कार्येण गतोऽस्ति । न विवरमहं जानामि । विषण्णः अधिकं किमपि न मय्यवादीत् ।

मान्त्रिकः—नागपट्टणात् किं नाविकमरकायोऽपि आगतोऽस्ति उत आर्य एव प्रतिनिवृत्तः ।

मीनाक्षी—नान्यः कश्चिदागतः । सर्वस्यापि कृते यदि वेद्यामास्यते तत्साधु । कार्यान्तरसत्त्वे तदर्थं यद्यन्यत्र क्वापि गत्वा आगंस्यते

तदपि 'साधु । इत एकनाडिकाया अन्तः शक्यमार्यं द्रष्टुम् ।

मान्त्रिकः— साधु । अहं गत्वा पुनरागच्छामि । आर्ये आगते स्थातव्यमिति ब्रूत ।' इत्यभिधाय बहिरचरत् । चरित्वा चतुःपञ्चानि गृहाण्यतिक्रम्य गतो मान्त्रिकः श्यामार्यस्य उपपुस्तकयितृकार्यालये किं कार्यं भवितुमर्हतीति समशेत । प्रासादविषयानुरोधेनैव गत इति, अथापि नौव्यापारी नागत इति अम्बा ब्रवीति । नौव्यापारिणं विना प्रासादक्रयणं तस्य कथं शक्यमिति चिन्तयतश्चिन्तयतो मान्त्रिकस्य सन्देहो दृढोऽभवत् । श्यामार्यस्यागमनं प्रतीक्ष्य एकत्रावस्थानात् सन्निहितं उपपुस्तकयितृकार्यालयं गत्वा निवर्तनं वरमिति कृतनिश्चयो मान्त्रिकः उपरि चलन् पञ्चभिर्निमेषैः तं कार्यालयमागतोऽभवत् । तत्र शतशो मनुष्याः मिलिता अभवन् । स्वं दृष्ट्वा मा स्म कश्चित् सन्दिग्धेति मान्त्रिकः जनसङ्घे मिश्रीभूय छन्नोऽभवत् । श्यामार्यं पेरुन्देवीं च कस्मिंश्चित् कोणे उपविष्टौ वीक्ष्य मान्त्रिकः श्यामार्यः आत्मानं माद्राक्षीदिति मुखं दिगन्तरे परावृत्य तयोः सम्भाषणमवदधे । अर्धनाडिका व्यपैत् । तदवधि बहूनि पत्रान्तराणि समर्पितानि । ततः परं सेवकः द्वारोपान्ते तिष्ठन् 'नाविको महम्मदमरकायः' इत्याक्रन्दत् । सपदि श्यामार्यः पेरुन्देवी च उभौ ससम्भ्रममुदतिष्ठताम् । तदा सङ्घे स्थितः कश्चन तुरुष्कः अन्तः प्राविशत् । तस्य पश्चात् श्यामार्यः अन्यः कोऽपि मनुष्यश्च अनुद्रुत्य अन्तरगच्छताम् । स तुरुष्कः अतिमहार्घाणि वस्त्राणि वसान आसीत् । अपि तु तस्य अतिकृशं शरीरं सुखदैन्यमदर्शयत् । कृष्णः अमांसलः रूक्षः अनागारिकश्च देहो ददृशे । तदीयानि वासांसि परं स महामनुष्य इत्यसूचयन् । आकृतिस्तु भिक्षोरिवाभवत् । अन्तः प्रविश्य उपपुस्तकयितुरग्रे स्थिते तस्मिन् विचारणा प्रारभ्यत ।

उपपुस्तकयिता—भवानेव नु नूर् महम्मदमरकायः ।

महम्मदीयः—आम् । अहमेव ।

उपपुस्तकयिता—का भवतः पुरी।

महम्म ... ... — नागपट्टणम्।

उपपु ... — पितृनाम किम्।

महम्म... — काचि मोहिदीन् मरकायः।

उपपु.... — किं भवतः कर्म।

महम्म... — नौव्यापारः।

उपपु... — मैलापुरे स्थितं भवदीयं प्राचीनं प्रासादं किं भवान् पेरुन्देव्यम्बायै विक्रीणीते?

महम्म... — आम्।

उपपु... — कतिभ्यो रूप्येभ्यः?

महम्म...—१०५०० रूप्येभ्यः।

उपपु... — कृत्स्नं धनं भवानग्रहीत्?

महम्म.... — आम्। अग्रहीषम्।

उपपु... — पत्रं पुस्तकायितुं युक्तम्?

महम्म... — आम्। युक्तम्।

उपपु.... — द्वौ साक्षिणौ कश्च कश्च?

महम्म... —'अयमार्य एकः। असौ श्रेष्ठी अपरः। इति पार्श्वे स्थितौ द्वावपि निरदिशत्। श्रेष्ठिनः तस्मिन् कार्यालये साक्ष्यकथनेनैव जीवनमवर्तत। एकस्य दिनस्य दशानां पत्राणां साक्ष्यं वदेत्। एकैकस्य पत्रस्य चत्वार आणकाः अष्टाणका इति रीत्या दिनस्य द्वित्ररूप्यावधि सम्पादयेत्। अपि तु दिनस्य पञ्चानां रूप्याणां उत्तमं मद्यमन्विष्य पिबेत्। सायं तस्मिन् गृहमागच्छति तदीयाः पानसुहृदः तमुद्वह्य आनीय गृहे विमुच्य गच्छेयुः। तं जानन्नपि उपपुस्तकायिता तस्य पानशीलतां नाजानात्। अपि तु तं पश्यन् सर्वदा सपहासं भाषेत। किमपि तपस्वी जीवनं करोतीति तस्य साक्ष्यमङ्गीकुर्वन्नासीत्। यथाशीलं तं दृष्टवान् उपपुस्तकायिता हसित्वा 'ओहो, श्रेष्ठिन् आगच्छतु भवान्। श्रेष्ठिरहितं पत्रं च नास्ति लोके तस्याविदितो मनुष्यश्च नास्ति। पोत-

वणिक्प्रभृति भिक्षुकपर्यन्तं सर्वं श्रेष्ठी वेद । श्रेष्ठिन्, इत आगच्छतु भवान् । (हसन्) किं भवान् मरकायं वेद ? नैव भवान् प्रष्टव्यः । कं पुनर्भवान् न जानामीति वदति ? इमं मरकायं कथमार्य भवान् वेद ? इत्यब्रवीत् । श्रेष्ठी दन्तं दन्तं प्रदर्श्य सानुरोधं सानुनयं नृत्यन्, 'जानामि । मुहुः आर्यस्य गृहमागच्छेत् । दृष्टवानस्मि' इत्यवदत् ।

उपपुस्तकायिता—सम्यक् । उपरतं भवतु । इत्थमागच्छतम् । कच्चिद्युवामुभौ इमं 'सायंपु' जानीथः ।

श्रेष्ठी, आर्यः—जानीवः ।

उपपु...—कच्चिदयं पोतवणिक् नूर् महम्मदमरकायः ।

श्रेष्ठी, आर्यः—आम् ।

उपपु...—प्रासादहेतोः यदेष १०'२०० रूप्याणि अगृह्णात् तत् कच्चिज्जानीथः ।

श्रेष्ठी, आर्यः—जानीवः ।

उपपु...—'सम्यक् । तं सेवकमुपगम्य हस्ताक्षरं न्यस्यतम् गच्छतम्' इत्युक्त्वा प्रेष्य पत्रे स्वहस्ताक्षरं दत्वा सेवकमभि चिक्षेप । पुस्तकितशुल्कः सपदि दापितः । मरकायः, श्रेष्ठी, आर्यः, त्रयोऽपि कस्मिंश्चित् कोणे स्थापितामुत्पीठिकां समया स्थितं सेवकमुपागच्छन् । सः पत्रस्य पृष्ठे तेषां नामधेयप्रभृतीन् विशेषान् लेखयामास । अपि च अङ्गुष्ठमभिपीड्य तदङ्कनमपि कारयामास । तदानीं श्यामार्यः किमपि तन्त्रमकरोत् । 'पितृनाम' इत्यस्य अग्रे स्वनाम 'स्वनाम' इत्यस्य अग्रे पितृनाम च विन्यस्यति स्म । 'महालिङ्गार्यस्य पुत्रः श्यामार्यः' इत्येतत्स्थाने 'श्यामार्यपुत्रः महालिङ्गार्यः' इति विन्यासमकरोदिति यावत् । कुत इति चेत्, तस्य मिथ्यापत्रस्य सज्जीकरणं प्रति पश्चात् किञ्चित् क्लेशसम्भवे 'साक्षित्वेन आगतो नाहम्' इत्यभिधानौपयिकतया तत् तन्त्रमकरोत् । तत् कोऽपि नावदधे । पादनाड्या पत्रपुस्तकनानुबन्धिनो व्यापारा निरवर्तन्त । पत्रं पेरुन्देव्यम्बायै देयमिति

प्रबलतरानर्थकारिणां तत्तत्कालेष्वशिक्षणे सति सोपि राजा सभ्यैः स्वनियामकैः पारिषदैः निगृह्यते । राज्याधिकारान्निवर्त्यते इत्यर्थः । तं नृपं परिहृत्यान्यो जनो नृपतया स्थाप्यत इति यावत् ।

एवमन्योपि दुर्ज्योतिषिकपरः—

छलिनं केवलकपटशालिनं ज्योतिषज्ञानशून्यत्वेपि तदभिज्ञवन्मानत्यमानं, सत्कथानर्हं नक्षत्रकथाया अनर्हं नक्षत्रगणनामप्यविजानन्तं स्वात्मना स्वमनसा, केवलस्वबुद्धिमात्रेणेत्यर्थः । उपहतानि विरुद्धं लिखितानि जातिकानि जातोद्देशेन कृतानि जातकशब्दितानि येन तथाविधं यथास्वबुद्धि किञ्चिज्जातकं विलिख्य समर्पयन्तमित्यर्थः । जातशब्दात् तस्य निमित्तमिति विहितः ठञ्वा तस्मै प्रभवतीति विहितः ठञ् वा कार्यः । निमित्तं च शुभाशुभसंबन्ध एव । तद्बोधकशब्दपर्यन्तमिह विवक्षणीयम् । जातकशब्दस्तु तदपभ्रंश एवेति ध्येयम् । तादृशं ज्योतिषकं यः पुमान् काले विवाहोपनयनादिशुभमुहूर्तदर्शनावसरे न निगृह्णाति न दूरीकरोति । सोऽपि सभ्यैः तद्बन्धुजनसंघैः निगृह्यते, अधिक्षिप्यते । मुहूर्तदोषनिरूपणेन विदूष्यत इति यावत् ।

एवं कर्णपरोप्यर्थः—

छलिनं जननमारभ्य वञ्चनमार्गैकप्रवणं जतुगृहनिर्माणद्यूतकपटादिसहायभूतत्वात्, सत्कथानर्हं दुष्टचतुष्टयान्तर्भूततया सद्व्यपदेशानर्हं स्वात्मना स्वदेहेन तत्पोषणेनेत्यर्थः । उपहता जातिः क्षत्रियत्वादिः यस्य तथाविधं सूतपरिपोषणात् सूतपुत्र इति व्यवह्रियमाणमित्यर्थः । यः अर्जुनः काले ब्राह्मणशापात् कर्णस्य युद्धकाले भूमौ रथचक्रमज्जनसमये न निगृह्णाति बाणमोक्षं न करोति । सोऽपि अर्जुनोऽपि सभ्यैः तत्सभामध्यस्थेन भगवता, पूजायां बहुवचनम् । निगृह्यते । पिशाचानां पिशाचभाषयैवोत्तरस्य देयतया आदित आरभ्य पाण्डवगणहननाय परश्शतवञ्चनमार्गकरणेनाधर्मैक-

निरतस्य समये प्राप्ते येन केनापि प्रकारेण वध एव समुचितो धर्म इत्युपदिश्य तद्वधाय नियुज्यत इत्यर्थः । अत एव दयावीरस्य श्रीरघुनन्दनस्य विश्रमाय रावणमोक्षणं लोकप्रसिद्धगुणेष्वनन्तर्भूतं दुर्वचमेवेति चित्रीयन्ते श्रीवत्साङ्कमिश्राः–'यस्तादृशागसमरिं रघुवीर वीक्ष्य विश्रम्यतामिति मुमोचिथ मुग्धमाजौ । कोऽयं गुणः कतरकोटिगतः कियान्वे'ति ।

एवं पाण्डुपरतयापि —

छलिनं वसन्तोत्सवार्थं बहुविधकपटवेषपरिग्रहात् वसन्तश्छली । वसन्तस्य शृङ्गारप्रियत्वात् साधुकथानर्हश्च सः । असभ्यपरिपाटिकामधिकरोति शृङ्गारितेत्युक्तः । स्वात्मना स्वस्वभावेन । स्वभावे परमात्मनीति वैजयन्ती । उपहता निवर्तिता जातिः जातिकुसुमं येन तं, जातिरहिते वसन्त इत्युक्तेः । तथाविधं वसन्तकालं यः पाण्डुः काले सति मृत्यौ सन्निहितेऽपि न निगृह्णाति तद्वैचित्र्यपरामर्शजनितकामोद्रेकवशात् माद्रीं निवर्तयितुमक्षमस्तामनुभुङ्क्ते सोऽपि पाण्डुः । सभ्यैः यमसभास्थैः देवसभास्थैर्वा निगृह्यते, नितरां गृह्यते । शिशुक्रन्दयमसभेति पाणिनिसूत्रात् यमस्यापि सभास्तीत्यवगम्यते । देवसभा च प्रसिद्धा सुधर्माख्या । तथा च वसन्तानिग्रहात् पाण्डुर्मृत इति भावः ।

एवं भीष्मपरोपि —

छलिनं द्यूतकर्मादिवञ्चनप्रवणं सत्कथायाः अनर्हं 'असत्कीर्तनकान्तारपरिवर्तनपांसुलाम् । वाचं शौरिकथालापगङ्गयैव पुनीमहे, इति सत्कथाया अप्यसत्कीर्तनरूपतापादकम् । स्वात्मना स्वस्वभावेन उपहता जातिः स्वजातिः येन तं स्वापराधमात्रेण स्वजातीयान् सर्वानपि विनाशयन्तं यः भीष्मः वस्त्रापहरणादिसमये न निगृह्णाति निवारणशक्तोपि सभामध्ये न निवारयति । सोऽपि भीष्मोपि । काले युद्धकाले सभ्यैः तत्सभानिष्ठैः पाण्डवैरेव निगृह्यते शिखण्डिनं पुरस्कृत्य विजीयते । काल इत्यस्य देहळीदीपवदुत्तरत्रापि संबन्धः ।

एवमेव कुंभकर्णादिपरोऽपि ।

छलिनं सन्न्यासिवेषपरिग्रहेण वञ्चनया सीतापहरम् । उच्यते हि— 'शूरोऽहमिति चात्मानमवगच्छसि दुर्मते । नैव लज्जास्ति ते सीतां चोरवद्व्यपकर्षतः ॥ यदि मत्सन्निधौ सीता धर्षिता स्यात् त्वया बलात् । भ्रातरं तु खरं पश्येस्तदा मत्सायकैर्हतः ॥' इति । सत्कथानर्हं असच्छब्दव्यपदेश्यं, स्वात्मना स्वस्वभावेन उपहता जातिः ब्रह्मर्षिकुलप्रसूतत्वादिः येन तं रावणं यः कुम्भकर्णादिः काले मन्त्रणादिसमये न निगृह्णाति अयुक्तमिदमिति न बोधयति निवारयति वा । सोऽपि तादृशो मन्त्रिगणोऽपि सभ्यैः वानरसभानिष्ठैः सैनिकैः निगृह्यते निहन्यते । यो न निगृह्णाति सोऽपि निगृह्यत इत्यपिशब्देन यो निगृह्णाति विभीषणः सोऽपि कपिभिः सालानुद्यम्य शैलांश्चेत्युक्तक्रमेण प्रथमं तिरस्क्रियत इति ध्वनितम् ।

एवं कथानधिकारिप्रच्छन्नसौगतादिपरोऽप्यर्थः । उक्तं हि शतदूषण्यां— सौगतानामिव प्रच्छन्नसौगतानामपि कथायामनधिकार इति । वेदार्थसंग्रहे चैतद्विशदमनुभाषितं— सर्वशून्यवादिनो ब्रह्मव्यतिरिक्तसर्ववस्तुमिथ्यात्ववादिनश्च स्वपक्षस्थापकप्रमाणपारमर्थ्यानभ्युपगमादभियुक्तैर्वादानधिकार एव प्रतिपादित इति । अत एव श्रीभाष्ये तदिदमित्यद्वैतिमतमनूद्य न्यायानुगृहीतवाक्यप्रत्यक्षादिसकलप्रमाणवृत्तयाथात्म्यविद्भिरनादरणीयमिति शिष्यान् प्रत्येवोपदेशः क्रियत इति । तदयमर्थः । छलिनं वस्तुतस्सौगततुल्यत्वेऽपि वेदवादेन प्रच्छन्नत्वात् कपटिनं, कथं ह्येवमसौ गतान् कपटसौगतान् खण्डयन्निति ह्युच्यते । सत्कथायाः तत्त्वनिर्णयार्थवादस्य अनर्हं वास्तवप्रमाणादिव्यवहारानभ्युपगमात् । उक्तं हि— 'वेदोऽनृतो बुद्धकृतागमोऽनृतः प्रामाण्यमेतस्य च तस्य चानृतम् । बोद्धानृतो बुद्धिफले तथाऽनृते यूयं च बौद्धाश्च समानसंस(वि)पा)दः' ॥ इति । स्वात्मनि स्वस्वरूपे उपहता जातिः आत्मत्वजातिः यस्य तं, सर्वात्मनामैक्यवर्णनात् व्यक्तेरभेदेन आत्मत्वस्याजातित्वादिति भावः । निर्विशेषत्वकथनाद्वा निर्धर्मकत्वमिति बोद्धव्यम् । तादृश-

मद्गोतिनं काले वादकाले यः मध्यस्थादिः न निगृह्णाति वास्तवप्रमाणाद्यनुपगमात् त्वं वादानर्ह इति न बहिष्करोति । सोऽपि तथाविधो मध्यस्थोऽपि सभ्यैः समास्तारैः निगृह्यते । माध्यस्थ्यात् परिह्रियते । पक्षपातिनस्तथात्वायोगादिति भावः ।

एवं भागवतवेषधारिदुष्टशूद्रपरतयापि—

केचिदिदानीं शूद्रदुर्जनाः पद्माक्षमालादिकं गळे निक्षिपन्तः न शूद्रोऽहं भागवत इत्युद्घोषयन्तो ब्राह्मणगोष्ठीषु यथेच्छं विहरन्ति । विप्रा अप्यर्थलोभात् तद्विषहन्ते । तांश्चोपालभते (छलिनमिति) केवलकपटवेषधारिणमित्यर्थः । सत्कथायाः अनर्हं कायान्नस्थलशुद्धयादिवितथैतिह्यकथनेन मोहयन्तमित्यर्थः । स्वात्मना स्वस्वभावेन वेषधारणमात्रेण उपहता विनष्टा जातिः शूद्रत्वादिः यस्य तं, तथाभिमन्यमानमित्यर्थः । तादृशं शूद्रं यः ब्राह्मणः काले गोष्ठीसमागमादिसमये न निगृह्णाति । मध्ये प्रवेशं न निरोधयति । सोऽपि ब्राह्मणस्तत्सहायभूतः, सभ्यैः तद्गोष्ठीनिष्ठैः निगृह्यते शूद्रतुल्यतया तिरस्क्रियते ।

एवं खण्डनकारोऽप्यनेन निर्धूतः ।

छलिनं प्रत्यक्षदृश्यमानवस्तुनोऽप्यसत्तारोपकच्छलोक्तिबहुलं वादस्य सर्वथा अनर्हं प्रत्यक्षविरुद्धस्वव्याघातकयुक्तिकूटोद्गारिणं न याति न च तत्रासीत् अस्ति पश्चान्नचांशवदित्यादिदुर्युक्तिभिर्घटत्वादिजातिं विमथ्नन्तं खण्डनकारं वादसभामध्येऽपि न प्रवेशयेदिति बोध्यम् ॥ ८ ॥

---

अकिञ्चित्कारिणां दीनैराकृष्टगुणकर्मणाम् ।
अघाय गतसत्त्वानां दर्शनस्पर्शनादिकम् ॥ ९ ॥

तदेवमुक्तरूपाणाम् खलानां निग्रहशक्तस्य तन्निग्रह एव प्रथमं कार्यं इति प्रसाध्य निग्रहाशक्तानां दुर्बलानां तत्संसर्गोऽवश्यपरिहरणीय

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशक्रोधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २१] कलि ५०४८ सर्वजित { कन्या वृश्चिक-साधारण सं १,३ तुला धनुः - शास्त्रानु- [बन्धः सं २,४

## भाषा ॥

देशभाषा । इयमभिवर्धनीया । इच्छन्नपि क इमां उपेक्षितुं अज्ञातुं वा शक्नुयात् । एकैकः इमां शैशवात् प्रभृति शिक्षते । स्वदेशे परस्परं व्यवहारः अनयैव प्रवर्तते । तस्मादस्या अभिवर्धने न कस्यचिद् विप्रतिपत्तिलेशोऽपि भवितुमर्हति ।

राष्ट्रभाषा । हिन्दीति हिन्दुस्थानीति च इमां व्यवहरन्ति । अस्यां परिचयं विना राज्यतन्त्रे प्रवेशो दुर्लभः स्यात् । अखण्डस्य भारतदेशस्य योगक्षेमनिर्वाहेऽपि हि द्रमिडदेशवासिभिरपि अवश्यं श्रद्धातव्यम् । अन्यथा तस्य पुनरपि अन्यैराक्रमणे द्रमिडदेशः कथं भवेत् ।

लोकभाषा । इयमाङ्गली । विदेशीयैः समागमोऽस्माकमवर्जनीयः संवृत्तः । एको देशः देशान्तरजैः सम्पर्कं विना स्वयमेव स्वव्यवहारं सर्वं वर्तयतीत्येतत् अस्मिन् काले दुष्करमभूत् । गतिसाधनैः युद्धसाधनैः संभाषणसाधनैः वाणिज्यवृत्तिविशेषैश्च यथाकथञ्चित् एकैकस्यापि देशस्य सर्वलोकसम्बन्धिषु व्यवहारेषु भागिता बलादापतति । तस्मादेतदुपयोगिनी अत्रत्यैश्चिरादभ्यस्ता आङ्गल्यपि सहसा उपेक्षितुं न शक्यते ।

एवं तिसृषु भाषासु अवश्यं परिचेयासु संस्कृतस्य क्वावकाशः । यद्यपि प्रकटं न वदन्ति तथापि बहूनामस्ति मतिः यदि संस्कृतं नश्येत् न काऽपि हानिस्तेन लोकस्य भवेदिति । तथा च चतुर्थ्या अस्या भाषायाः परिचयः बालानां वृथा क्लेशदायीति इमां कलाशालासु पाठ्यपट्टिकायां बहिष्कर्तुमिच्छन्ति । सद्यः अत्यन्तबहिष्कारे धैर्यविरहात् पारसीकभाषादिभिर्वैकल्पिकतया अल्पमवकाशं दित्सन्ति ।

अभिज्ञैः तेषां प्रतिबोधनं कर्तव्यम् । देशभाषाणां संस्कृतस्य चातिनिबिडः सम्बन्धः । संस्कृतस्य नाशे देशभाषा अपि नष्टा एव । संस्कृतमनादृत्य देशभाषाभिवर्धनं शक्यं कर्तुमिति मनोरथमात्रमेतत् । संस्कृतानभिज्ञस्य देशभाषापण्डितस्य तदभिज्ञस्य देशभाषापण्डितस्य च महदन्तरं प्रत्यक्षमीक्ष्यते । देशभाषास्वरूपं यद्यपि संस्कृताद्भिन्नं तथापि देशभाषानिबद्धग्रन्थप्रतिपाद्या विषयाः सर्वे प्रायेण संस्कृतग्रन्थप्रतिपाद्या एव । एतदुपजीवनेन प्रतिपादिता वा । अतस्तेषां स्फुटप्रतिपत्तये सन्देहनिवारणाय च संस्कृतग्रन्थपरिचयोऽवश्यापेक्षितः । कम्बरामायणसूक्ष्मार्थाः वाल्मीकिरामायणवेदिनां सुग्रहा भवन्ति न तथा केवलद्रविडपण्डितानाम् । तोल्काप्पियमित्यस्मिन् प्राचीने द्रविडव्याकरणग्रन्थे संस्कृतज्ञैरेव ज्ञातुं शक्याः तद्ज्ञानविरहेण केवलद्राविडैरगृहीता बहवः सूक्ष्मार्थाः अद्यापि गूढा वर्तन्ते । तिरुक्कुरळ्–ग्रन्थस्य वेदत्वेन द्राविडैः पूज्यमानस्य प्राचीनस्य तात्पर्यमद्यापि प्रायोऽगृहीतमेव । संस्कृतज्ञानसंपन्नैरेव तदुपलम्भः शक्यः । तस्माद्देशभाषाभक्तैरवश्यमेव संस्कृतभक्तैरपि भाव्यम् । द्वे इमे अस्माकं चक्षुषी तत्त्वज्ञानसंपादनाय, संस्कृतं च देशभाषा च । यथा एकस्य पीडा न युज्यते तथाऽपरस्यापि । एकत्र द्वेष उभयद्रोह एव पर्यवस्यति ।

प्राचीनाः देशभाषाग्रन्थनिर्मातारः येकेचिदपि न संस्कृतद्वेषिण आसन् । प्रत्युत तस्मिन् परमं गौरवं बिभ्रतः तदनुसारेणैव स्वग्रन्थान् निरमिमत ।

एवं सति एषु पक्षपातेन मूलद्वेषिणो यदि भवेम एभ्यो ग्रन्थकारेभ्य एव वा द्रोहमाचरितवन्तो भवेमेति निरूपकैर्विभाव्यम् ।

एवमपि एकैको बालः कथं भाषाचतुष्टयमधीयीत । न हि बालानां बुद्धिः एतावन्तं श्रमं सहिष्यते । अतिपीडा हि एवं कृता भवेत् । इति बहवः बिभ्यति । अस्थाने इयं भीतिः । नायमतिभारो बालानाम् । अगत्या तावति श्रमे कर्तव्ये आपतिते कालक्रमेण श्रमबुद्धिरपेयात् । भाषा-चतुष्टयमपि अनायासेन परिचेष्यन्ति । इति केचिदत्र समादधति । देशान्तरेषु चतसृणां भाषाणां परिचयोचितं संविधानं बह्वीषु कलाशालासु कृतमस्तीति च वदन्ति ।

वयं तु ब्रूमः । द्राविडीप्रभृतिषु देशभाषासु तत्तद्देशे जातानां परि-चयः अयत्नसिद्धो भवति । आरम्भविद्यायां पञ्चकक्ष्यावधि च उपाध्याय मुखात् शिक्षा भवति । एवं लेखनभाषणोपयुक्तायां देशभाषाव्युत्पत्तौ समी-चीनायां सर्वेषां सम्पन्नायां मध्यमोत्तमविद्यापर्वणोः विशेषपरिचयः कस्या भाषाया भवतु इति विमर्शे यद्यपि एकैकेन बालेन देशभाषा संस्कृतमित्युभ-यत्र विशेषपरिश्रमः कर्तुं न शक्यः तथापि इच्छया कैश्चिद्देशभाषायां कैश्चित् संस्कृते इति परिश्रमविभागः कार्यः । तेन भाषाद्वयमपि सुरक्षितमभिवर्धितं च भविष्यति । सति सौकर्ये कालान्तरे देशभाषाध्यायिभिः संस्कृतं संस्कृ-ताध्यायिभिः देशभाषां च परिचित्य विज्ञानपरिपाकश्च सम्पादयितुं शक्ष्यते । यथाकथञ्चित् संस्कृतं यथा न विनश्येत् तदध्ययने यथा बहूनामुत्साहो भवेत् तथा संविधानं राज्यधुरन्धराणां धर्मः, यस्य अपरिपालने दृष्टोऽदृष्टश्च प्रत्यवायोऽतिमहान् । एवं तत्त्वबोधनं संस्कृताभिज्ञानां विदुषां धर्मः । औदासीन्यं विना तत्र तत्र मिलित्वा विषयं विशदमुपपाद्य सर्वेषां जनानां तद्द्वारा विद्याधिकारिणां च दृष्टिरस्मिन् विषये अविलम्बेन आकृष्टव्या ।

---

# परिपन्थिशब्दः ॥

(V. R. Srinivasa Tatacharya Siromani)

(अनुवृत्तः)

लोके तु साहयतेः क्विप् इत्यस्य बालमनोरमायामेवं व्याख्यानं दृश्यते— 'ननु ण्विप्रत्ययस्य छन्दोविषयत्वे तुरासाहृशब्दस्य कथं लोके प्रयोग इत्यत आह लोकेऽविति । सहेर्ण्यन्तात्क्विपि णिलोपेऽपृक्तलोपे च साति लोके प्रयोज्य इति भाव' इति । अनेन पूर्वोक्तचन्द्रकलाव्याख्यानेन च शेखरस्थस्य एतेनेत्यस्य ण्विप्रत्ययस्य छन्दोविषयत्वेऽपि लोके ण्यन्तात्सहेः क्विबाश्रयणेनेत्येव सर्वसम्मतोऽर्थो वक्तव्य इति निर्धार्यते । कौमुद्यां हलन्तपुंलिङ्गहकारान्तप्रकरणे विश्ववाहनडुहृतुरासाहां क्रमेण प्रक्रिया न्यरूप्यत । तत्र विश्ववाहृशब्दनिरूपणान्ते 'छन्दस्येव ण्विरिति पक्षे णिजन्ताद्विच्' इत्युदैर्यत । ग्रन्थोऽयं बालमनोरमायां सावतरणमेवं व्याक्रियत— "ननु 'वहश्च' इति ण्विविधौ 'छन्दसि सह' इत्यतश्छन्दसीति केचिदनुवर्तयन्ति । तन्मते विश्ववाहृशब्दस्य लोके कथं प्रयोग इत्यत आह छन्दस्येव ण्विरितिपक्षे णिजन्ताद्विजिति । विश्वं वाहयतीत्यर्थे वाहृ इति ण्यन्तात् 'अन्येभ्योऽपि दृश्यत' इति विचि 'नेड्वशिकृति' इतीडभावे णिलोपे अपृक्तलोपे उपपदसमासे विश्ववाहृशब्दो लोके प्रयोगार्ह" इति । अत्र शेखरे णिजन्ताद्विजिति प्रतीकमुपादाय 'अनेन लोके विश्ववाड्शब्दस्य साधुत्वमात्रमुच्यते न त्वस्योठ् णिलोपस्य स्थानिवत्त्वात् अङ्गभसंज्ञाक्षिप्तप्रत्ययेन वाहोविशेषणात्' इति ग्रन्थेन णिजन्ताद्विजङ्गीकारे लोके विश्वौह इत्याद्यसिद्धिमुक्त्वा ण्वोदिते विजग्रहणस्य क्विपोऽप्युपलक्षणत्वे प्राप्तं विश्ववाडित्येव न स्यात् संप्रसारणप्रवृत्तेरित्याशङ्कां वच्यादिभ्य इत्यादिग्रन्थेन परिहृत्य व्युत्पत्त्यन्तरासाध्यस्य विश्वौह इत्यादेः लोके सिद्धये "वस्तुतो 'विभाषा पूर्वाह्णापराह्णाभ्यां' इति सूत्रे प्रष्ठौह आगतं प्रष्ठवाड्रूप्यमिति भाष्ये लौकिकविग्रहवाक्ये प्रष्ठौह इति प्रयोगादन्यत्रापि ण्विः तदुक्तमिति पक्षे इति" इत्यभ्यधायि । अत्र व्याख्यातृभिः प्रष्ठौह इति भाष्योदाहरणेन 'वहश्च' इति सूत्रे छन्दसीति नानुवर्तते । तदुत्तर-

सूत्रयोस्तु मण्डूकप्लुत्या अनुवृत्तिः कल्प्यत इति शेखरस्य भावोऽवर्ण्यत । एतत् 'अस्य लोकेऽपि प्रवृत्तिं केचिदिच्छन्ति' इति 'वहश्च' इति सूत्र-शेखरेऽपि स्पष्टम् । ततश्चायमर्थो निर्गलति— 'छन्दसि सह' इत्यत्र छन्दसीति पदसत्त्वात् सहतेर्ण्विप्रत्ययश्छन्दस्येव भवति । लोके तु साह-यतेः क्विब्विचोरन्यतरः । 'वहश्च' इति सूत्रेण विहितो ण्विप्रत्ययस्तु तत्र छन्दसीत्यस्यानुवृत्त्या लोकेऽपि भवतीति । लोके सहतेर्ण्विप्रत्ययस्य केनाप्यनभ्युपगमात् 'वस्तुतः......अन्यत्रापि ण्विः' इति ग्रन्थोक्त-लौकिकण्विप्रत्ययान्तवहधातुशालिविश्ववाहादिशब्दभिन्नक्विबन्तानडुहशब्द-निरूपककौमुदीव्याख्यानपरबहुवाक्यव्यवहिते लोके ण्विति प्रतीक-मुपादयोक्ते "एतेन 'तुराषाण्मेघवाहनः' इति व्याख्यातम्" इति शेखर-वाक्ये स्थितस्य एतेनेत्यस्य ण्यन्तस्य लौकिकत्वेनेत्यर्थः कथं लभ्यत इति न प्रतिपद्यते । लोके साहयतेः क्विबङ्गीकारेण लोकवेदसाधारणामरकोशे तुराषाट्छब्दपाठ उपपद्यते । तदनङ्गीकारे तत्र छन्दोमात्रगोचरण्व्यन्त-तुराषाट्छब्दपाठो नोपपद्येतेति एतेन......व्याख्यातमित्यस्य भावः । सुधायां तुराषाट्छब्दस्य 'तुरं साहयति अभिभवति......ण्यन्तात्सहेः क्विप्' इत्यादिग्रन्थेन प्रक्रियां निरूप्य बहुषु स्थलेषु स्वोपन्यस्तेन छान्दसस्य लोके प्रयोगाभावादिति हेतुना कोशप्रयुक्ततुराषाट्छब्दे 'छन्दसि सह' इति ण्विं वदन्तौ स्वामिमुकुटौ निरासिषाताम् ।

एवम् अमरकोशपठितो भविष्णुशब्दोऽपि लोकवेदसाधारण एव । शब्दोऽयं 'भुवश्च' इत्यनेन साध्यते । अस्य सूत्रस्य व्याख्यानं महाभाष्ये नोपलभ्यते । अत्र कौमुद्यां 'छन्दसीत्येव । भविष्णुः । कथं तर्हि 'जगत्प्र-भोरप्रभविष्णु वैष्णवम्' इति ? निरङ्कुशाः कवयः । चकारोऽनुक्तसमुच्च-यार्थः । भ्राजिष्णुरिति वृत्तिः । एवं क्षयिष्णुः । नैतद्भाष्ये दृष्टम्' इत्यगद्यत । अत्र शेखरे 'योगविभाग उत्तरार्थः । इदं लोकवेदसाधारणमिति आढ्य-सुभगेतिसूत्रभाष्यस्वरस' इत्यादिकमुक्त्वा 'नैतदिति । छान्दसत्वमनुक्त-समुच्चायकत्वं चेत्यर्थ' इति व्यब्रियत । एतद्व्याख्यानभाष्येऽनुपलभ्यमाने 'भाष्यादौ छान्दसत्वमेव स्पष्टम्' इति वदन् माधवाचार्यः एतच्छेखर-विरोधात् 'यत्तु वृत्रघ्न इत्यादौ वैकल्पिकं णत्वं माधवेनोक्तम्' 'वचन-सामर्थ्यादालोपो न स्थानिवत् इति वामनमाधवौ' इत्यादिकौमुदीवाक्य-दूषितस्थलेष्विवात्राप्युपेक्षणीय एव । भविष्णुशब्दस्य लोकवेदसाधारण-त्वेऽपि प्रभविष्णुशब्दश्छान्दस एवेति कौमुद्यभिप्राय इति कथनं त्वस्मिन्नर्थे

4

कथं तर्हीत्यादिशङ्कातत्समाधानपरग्रन्थसमन्वयस्य दुष्करत्वान्न युज्यत एव ।

शिखावानाशुशुक्षणिरित्यमरकोशे आशुशुक्षणिपदं लोकवेदसाधारणमेव । सुधायामस्य छान्दसत्वं ज्ञापकाद्भाषायां साधुत्वं चोपपाद्य छान्दसस्यामरकोशे पाठेऽनौचित्यस्य ज्ञापकात् तस्य लोके कचित् साधुत्वस्य समर्थने असाधुत्वपर्यवसानस्य चानुसन्धानेन 'आशु शीघ्रं आशुं व्रीहिं वा शु क्षणोति क्षणु हिंसायां इन् शु इति पूजार्थमव्ययम्' इति व्याख्यानान्तरं व्यतन्यत । एवमेव वास्तोष्पत्यादिशब्देषु छान्दसत्वोपपादकमतान्तरस्य निरासेन संवलितं लोकवेदसाधारण्यानुगुणं व्याख्यानं लक्ष्यते । ततश्च एतेनेत्यादिशेखरग्रन्थेन 'एवं च कृत्वा निघण्टुषु पाठोऽप्युपपन्नो भवति' इति गिरिशशब्दनिरूपणावसरे स्थितेन निघण्टुष्विति बहुवचनान्तयुक्तेन पूर्वोक्तहरदत्तवचनेन बहुषु शब्देषु छान्दसत्वसाधकप्रक्रियामन्यसम्मतां निरस्य व्युत्पत्त्यन्तरेण लौकिकत्वं साधयन्त्या सुधया कल्पद्रुमादिग्रन्थैश्च अमरसिंहः स्वकोशे छान्दसशब्दान् नैवापठत् इति सिद्धान्तो दुष्प्रतिक्षेप एव भवति । विस्तरः परस्तात् । 'राबेश्चाजसौ' इति सूत्रव्याख्यानेषु राविशब्दात् संज्ञाछन्दसोर्ङीपि रावीशब्द आद्युदात्तः । लोके त्वसंज्ञाविषये, जसि वेदे च व्युत्पत्तिपक्षे 'कृदिकारादक्तिनः' इति, अव्युत्पत्तिपक्षे 'सर्वतोऽक्तिन्नर्थात्' इति ङीषि अन्तोदात्त इति प्रत्यपाद्यत । अनेनापि छान्दसस्यापि शब्दस्य व्युत्पत्त्यन्तरेण भाषायां साधुत्वमित्यर्थः समर्थितो भवति । एवम् अच्छान्दसानामपि नारीवास्तव्यानियम्यादिशब्दानां व्युत्पत्त्यन्तरेण साधुत्वस्य समर्थनं व्याकरणग्रन्थेषु दृश्यते । (अनुवर्ती)

# भास्करप्रणामः ॥

लोकैकदीपं प्रणमामि सूर्यं निजप्रभापूरितसर्वदिक्कम् ।
यः सर्वलोकप्रसृतप्रतापः तनोति भद्रं भजतामजस्रम् ॥

नित्यं प्रभाते सरसीरुहाणि विकासयन्तं दिवसेशमीडे ।
ममापि नित्यं हृदयाम्बुजातं विकासयत्वब्जसखः स देवः ॥

वेदैरशेषैर्विविधैश्च शास्त्रैः संस्तूयमानो जगदेकचक्षुः ।
अखण्डविश्वप्रसृतप्रभावः तनोतु पूषा मम तापमीशः ॥

तोण्डमूले नारायणभट्टः

---

षेक्स्पिअर् - कृतं

# यथाभिमतम् ॥

सिलिआ— बाल्ये स्थित, मान्यपुरुष, एवं धैर्यप्रद उत्साहः तव वयसोऽधिकः। अस्य मनुष्यस्य यदुग्रं बलं तत्प्रत्यक्षं दृष्टवानसि। यदि त्वं स्वयं स्वनेत्राभ्यामद्राक्षीः, यदि त्वं स्वस्वरूपं विविच्य स्वात्मानं अज्ञासीः, अस्मात् साहसाज्जाता भीतिस्त्वां प्रतिबोधितवती भवेत्— समानेन स्पर्धा क्रियतामिति। तवैव हिताय अनुनाथामः 'आत्मरक्षां सम्पादय। इमां प्रवृत्तिं परित्यज'।

रोसलिन्ड्— तथा कुरु, आर्य। तेन ते कीर्तिरन्यथा न भविष्यति। यथा मल्लयुद्धं न प्रवर्तेत तथा वयं राज्ञ विज्ञाप्य संविधास्यामः।

आर्लण्डो— अहं वामनुनाथामि मा स्म भवत्यौ अनया क्रूरचिन्तया मां दण्डयताम्। ईदृश्योः लोकोत्तरयोः सुन्दर्योरभिमतं किमप्यकुर्वन् अहं सत्यं महापराधी भवामि। अथापि भवत्योः कोमलाः कटाक्षाः शुभा आशिषश्च परीक्षायै गच्छन्तं मामनुगच्छन्तु। तत्र यदि भग्नः स्याम्। तस्य केवलं परिभवो भवति, यस्य कदापि गौरवं नासीत्। यदि निहतः, स एव मृतो भवति यो मर्तुं कामयते। न मे मित्रेषु अपराधी भविष्यामि, यतः न मे कश्चिदस्ति, यो मामनुशोचेत्। न लोकस्य काञ्चन पीडां कृतवान् भविष्यामि, यतः न तस्मिन् मदीयं किमप्यस्ति[१]। केवलं तत् स्थानमहं अस्मिन् लोके पूरयामि यत् मया रिक्तं शोभनतरं आक्रान्तं भवेत्।

---

१ तदीयस्य कस्यचिद् वस्तुनः सत्त्वे तस्य मरणे सति अप्रत्यवेक्षितं तद्वस्तु विनश्येत्। तथा च लोकस्य पीडा भवेत्। न च तादृशं किमपि वस्तु तस्यास्तीति भावः।

रोसलिन्द्— यत् अल्पं बलं ममास्ति तत् अहं कामये त्वामेतु।

सिलिआ— मदीयं च तदीयं वर्धयितुम्।

रोसलिन्द्— विजयस्व। दैवं प्रार्थये त्वयि भ्रान्ताहं भवानीति[१]।

सिलिआ— ये कामास्तव हृदये सन्ति ते तव संपद्यन्ताम्।

चार्लेस्— आगतः[२]। क नु खल्वस्त्ययं बालवीरः यः तथाऽभिलाषुकः मातरि भूमौ शयितुम्।

आर्लण्डो— सज्ज, आर्य। अपि तु तस्य सङ्कल्पः अनुद्धतप्रवृत्तिः।

राजा— एकस्मिन्नेव पाते भवद्भ्यां यत्नः कार्यः।

चार्लेस्— न। अत्रभवन्तं सनिर्बन्धं प्रार्थये— प्रथमादेव तं निवर्तयितुं तथा बलादुद्युक्तवता भवता न द्वितीयाय स उपसान्त्वयितव्यः[३]।

आर्लण्डो— पश्चात् ममोपहासे मतिं कुरु। पूर्वमेव मामुपहसितुं नार्हसि। त्वदीयं पन्थानं तु प्रतिपद्यस्व[४]।

रोसलिन्द्— बालपुरुष, अद्य ते हेर्कुलिस्[५] साहाय्यं करोतु।

सिलिआ— अस्ति मे कामः अदृश्या भूत्वा प्रबलं वटुं पादे गृह्णीयामिति।

[ चार्लेस् आर्लण्डो च युध्येते ]

रोसलिन्द्— अहो लोकोत्तर बालपुरुष[६]।

---

१ त्वां बालं दुर्बलमहं मन्ये। इयं मतिर्मे भ्रमो भवतु। प्रबलो भवेरित्यर्थः।

२ अहमागतः। सज्ज इति भावः।

३ निषेधायापि द्वितीयस्योपक्षेपः तस्य तत्रोत्साहं जनयेत्। न च बालकोऽयं तपस्वी तथा प्रवर्तनीय इति भावः।

४ यत् ते अद्य कर्तव्यं तत्कुर्वित्यर्थः। ५ अयं कश्चित् वीर्ये प्रसिद्धः ग्रीक्-पुरुषः। ६ सूक्ष्मदर्शिनी रोसालिन्द् जयोन्मुखं आर्लण्डो-इमं पश्यन्ती एवमुल्लपति।

सिलिआ— यदि मे चक्षुषि अशनिरभविष्यत् केन पतितव्यमिति वक्तुमहं शक्नुयाम्[१] । [चार्लेस् पतितः । कलकलः[२]]

राजा— न भूयः न भूयः ।

आर्लण्डो— आम् । अत्र भवन्तमनुनाथामि । न मे अद्यापि श्वासः सम्यक् प्रवर्तते[३] ।

राजा— त्वं कथं वर्तसे, चार्लेस् ?

ले बो— न स भाषितुं शक्तः, प्रभो ।

राजा— इममपवह [चार्लेस् अपनीतः] किं ते नामधेयं कुमार ।

आर्लण्डो— आर्लण्डो विभो । रोलन्द्-दे-बायूस्-अस्य कनिष्ठः पुत्रः ।

राजा— यदि भवसि सुतोऽन्यस्य तन्मे प्रियं स्यात् ।
तव पितरमुदारं मानयन्नास्त लोकः
तदपि तमहमासं शत्रुमेवाभिपश्यन् ।
यदि पुनरभविष्यस्त्वं कुलेऽन्यत्र जातः
प्रमुदितमकारिष्यः कर्मणानेन मां त्वम् ।
भव कुशलसमृद्धः, धैर्यशोभी युवा त्वम् ।
स्वपितरमपरं त्वां कामयेऽहं ब्रुवाणम् ।

(निष्क्रान्ताः राजा अनुचराः ले बो च)

---

१ दर्शनमात्रेणैव अशनिना अभिहत्य पातयिष्यामीति भावः ।

२ 'कलकलः । चार्लेस् पतितः' इति विपर्ययेण केचित् पठन्ति । यथास्थितं तु उचितं वयं मन्यामहे ।

३ कलकलं शृण्वन् राजा यथाप्रतीक्षं आर्लण्डो-इमं पराजितं मत्वा तस्मिन् दयया चार्लेस्-इममुद्दिश्य 'न भूयः न भूय.' इति चक्रन्द । आत्मन एव जिष्णुत्वात् राज्ञो वचनमात्मन्येव समन्वितं प्रकाशयन् आर्लण्डो 'न भूयो युद्धं कर्तव्यमिति यद्भवतोच्यते।' तद्युक्तम् । तदेवाहमपि प्रार्थये, यतः प्रथमयुद्धश्रमोऽद्यापि मे न शान्तः । युद्धश्रमजनितो हि तीव्रः श्वासोऽनुवर्तमान एव अस्ति इत्याहेत्यवधेयम् ।

# पाठशुद्धिविमर्शः ॥

(T. E. Viraraghavacharya Siromani)

वैश्वानराधिकरणश्रीभाष्यान्ते 'अग्न्यादित्यादीन्' इत्यत्र अग्नीति अनन्वितमिति उक्त्वा 'द्य्वादित्यादीन्' इति अशोधि श्रीमत्प्रधानाचार्यस्वामिभिः । पाठशुद्धिरियं पूर्वस्यां सञ्चिकायां प्राकाशि । इयं विमृश्यते । 'अग्निर्मूर्धा इति, असौ वै लोकोऽग्निः' इति च दिवोऽग्निशब्देन श्रौतो व्यवहारः दृश्यते । अग्निरिह द्युलोक इति चाभाषि स्मर्यमाणमिति सूत्रेऽत्रैव । अतः पर्यायेणाग्निशब्देन दिवो निर्देश उपपद्यते । 'स्वर्लोकादित्ये'ति च सारावली पर्यायान्तरेण निर्दिशति । उपनिषद्भाष्येऽनुवादस्त्वंशतश्शब्दवैरूप्यसहः पाठभेदसमर्थनाय नालम् । पुरुषं, 'ब्रह्मप्राप्तिफलं' 'उपासकस्य शरीरे' 'मध्यकायभूताकाशः' इत्यत्रेव द्य्वादित्यादीन्' इत्यत्रापि प्रकृतभाष्यार्थानुवादमात्रं स्यादपि । 'अतोऽग्न्यादित्यादीन्' इति पाठे न काप्यनुपपत्तिः ।

[स्थितं यथाकथञ्चिन्नेतुं शक्यमित्यत्र न पाठान्तरदर्शिनां विप्रतिपत्तिः । अपि तु प्रकरणस्थस्य द्युशब्दस्य आदित्यशब्दस्येवोपादानं स्वरसम् । प्रयोजनलेशं विना प्रकरणान्तरपठितस्य अर्थान्तरे प्रसिद्धस्य अग्निशब्दस्य किमिति भाष्यकारेणोपादानं कृतं भवेत् । शून्यहृदयत्वं हि तथा सत्यापतेत् । सारावलौ स्वर्लोकशब्दश्च भाष्ये द्युशब्दसत्त्वमेव स्वरसतो गमयति । यद्युपनिषद्भाष्ये पदान्तराण्यशुद्धानि भाष्याननुरूपाणि कामं तानि शोध्यन्ताम् । 'द्य्वादित्यादीन् इत्यत्र तु अयमेव पाठो भाष्यकारमुखोद्गतो भवितुमर्हतीति मतिरवशाद् भवति । ] [ D. T. T. ]

Registered No. M 2300.

Book XXI ॥ श्रीः ॥ Nos. 5 & 6

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २१] कलि ५०४८ सर्वजित | मकर } कुम्भ } | साधारण सं ३ | शास्त्रानुबन्धः सं ३ | आहत्य ,, ६

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

January & February 1948

## विषयाः ॥

शास्त्रानुबन्धः—
कुवलयानन्दः । [बुधरञ्जनीसमेतः] २२९—२३६

1 मेनका ।
2 सुभाषितनीवी ।
3 महद्दैवतम् ।
4 परिपन्थिशब्दः ।
5 यथाभिमतम् [नाटकम्]
6 रक्ष कृपाळो ।
7 सरससंवादः ।
8 प्रतिबोधनम् । [in the wrapper]

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविडया वा न तु भाषान्तरेण) ।

८. लेखप्रतिलेखषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari*
*Panditaraja* **D. T. Tatacharya Siromani M. O. L.**
Lecturer, Sri Venkateswara College,
TIRUPATI.

R S V L
00987
LIBRARY

मरकायो लिखितमकरोत् । तत् परेद्युः प्रातर्दीयतेति उपपुस्तकयितरि वदति, तदाकर्णितवन्तस्ते त्रयोऽपि सपदि बहिर्निरगच्छन् । तदवधि बहिः स्थित्वा वृत्तानि अवहितवती पेरुन्देव्यम्मा स्वस्य महाप्रासादस्वामिनीत्वं सम्पन्नमनुसन्धाय प्रमोदं प्रभुत्वं गात्रवृद्धिं चालभत । चत्वारोऽपि कार्यालयसन्निवेशं विहाय बहिः स्थितं पन्थानमागच्छन् । अनन्तरपत्रस्य साक्ष्यं वक्तुं गन्तव्यमिति श्यामार्येण दत्तमाणकाष्टकं प्रतिगृह्य श्रेष्ठी कार्यालयस्य अन्तरधावत् । अन्ये त्रयोऽपि पादचारेण स्वावासान् प्रतिजग्मुः ।

तदवधि वृत्तानि सर्वाणि सम्यगवहितवान् मान्त्रिकोऽपिताननु अचरत् । आतपार्थमिव स्वमुखं उत्तरीयेण कथमप्यावृण्वन् सः तानन्वगच्छत् । 'तीतारप्पमुदलि'वीथीं समया तेष्वागतेषु मरकायः अन्ययोर्द्वयोरनुमतिं लब्ध्वा तस्यां वीथ्यां प्रविवेश । श्यामार्यः पेरुन्देवी च स्वगृहं प्रत्यगच्छताम् । मान्त्रिकश्च तीतारप्पमुदलिवीथ्यां प्रविष्टः नाविकं मरकायमन्वसरत् । सा अतिदरिद्राणां महम्मदीयानामावासभूतैरल्पैर्गृहैरुपाचिता वीथी । तत्र चतुःपञ्चभ्यो गृहेभ्यः परतः स्थितस्याल्पस्य गृहस्यान्तःप्रविश्य असदीयो नाविकः अन्तर्हितोऽभवत् । मान्त्रिकः वीथ्यामेव पादनाडिकापर्यन्तं स्थित्वा पश्चात् तस्य गृहस्य द्वारमभ्येत्य स्थित्वा 'भायि भायि' इत्याह्वयत् । अन्तः स्थितो मरकायः 'कः सः' इति पृच्छन् बहिरागत्य द्वारे कवाटस्थाने लम्बितायाः गोणीयवनिकायाः परतः स्थित्वा स्वशिरोमात्रं बहिः प्रसारयामास । तदा बहिः स्थितः कोऽपि माहम्मद इत्यवगमसमनन्तरं स यवनिकाया बहिरागत्य 'का सङ्गतिः । को भवान्' इत्यपृच्छत् । तदा तेन नौवणिग्वेषमपनीय मत्स्यवणिग्वेषस्य धृतत्वात् दुर्गन्धः 'गुभी'रिति विससार । चेलयूकाः वस्त्रस्योपरि सोल्लासं व्यहरन् । तस्मिन् वस्त्रे वातप्रवेशहेतोः द्वारगवाक्षादीनि परिपूर्णान्यवर्तन्त । सामिखादितरोट्टिखण्ड एकः तस्य हस्ते आसीत् । उपपुस्तकयितुः कार्यालयमागतः नाविकः

किं स एवेति मान्त्रिकः समशेत । अपि तु सः स्वमुखे कमपि विपर्यासमप्रदर्शयन 'भाइ सलाम् । इदमेव हि सप्तदशसङ्ख्यं गृहम् । अस्मिन् हि 'आदंसा' रावुत्त अवसत् । स किमन्तरास्ते ?' इत्यब्रवीत् ।

मरकायः—(सम्मोहं कोपं च प्राप्य) इदमेव सप्तदशसङ्ख्यं गृहम् ' अस्मिन्नहं दश वर्षाणि वसन्नस्मि । 'आदंसा' इति न किल कोऽपि अत्र वर्तते ।

मान्त्रिकः— तथा नु । 'सप्तदशसङ्ख्ये गृहे वसामि' इति ह्यवादीत । किं तावद् भवन्नामधेयम् ?

मरकायः—इदं मदीयं गृहम् । मत्पितामहकालात् प्रभृति इदमस्माकं स्वभूतम् । माण्डलिककार्यालये 'पाच्चा मोहिदीन्' इति मम नाम्ना निर्दिष्टमस्ति । प्रमाणपत्रं किं दर्शयानि ? इति सोल्लुण्ठनमभणत् ।

तदाकर्णितवान् मान्त्रिकः अतीव प्रश्रितः 'भाइ, मास्म कुप्यः । मम सुहृत् सङ्ख्यां विपर्यस्योक्तवानिव । भवान् गत्वा आहारं करोतु । अहमपि गच्छामि । सलाम्' इत्युक्त्वा अपासरत् । मरकायोऽपि अन्तरगच्छत् ।

मान्त्रिकः सम्प्रति गत्वा तोळशिङ्कप्पेरुमाळ्कोविल्-वीथीं प्राप्य श्यामार्यगृहमागत्य पूर्ववत् 'अम्ब अम्ब आर्यः किमागतः?' इत्यपृच्छत् ।

मनाक्पूर्वं मान्त्रिकस्य आगमनं मीनाक्ष्या ज्ञातवान् श्यामार्यः सपदि देहलीमागत्य मान्त्रिकं दृष्ट्वा देहलीवेद्यामुपवेष्टुं प्रीत्या प्रार्थयामास । सद्यः स तत्र उपाविशत् । आर्योऽपि एकस्मिन् पार्श्वे उपविश्य तत्रत्ये मृन्मये अपाश्रये साचीभूय 'कच्चित् स्वामिनः सकाशाद् भवानागच्छति ?' इति पप्रच्छ ।

मान्त्रिकः—आम् ।

श्यामार्यः—स नागपट्टणं गत इत्यवोचन् । अहमेव समीपकाले तत्र

गत आसन् । स नैव आगत इत्युक्तवन्तः । अद्य स्वामी कुत्र आस्ते ? अत्र आगतः ? अथवा बहिर्ग्रामान्तरे वर्तते ?

मान्त्रिकः—स नागपट्टणं नैव अगच्छत् । तत्र गच्छामीत्युक्त्वा मत्सकाशमागतोऽभूत् । अहं मलयाले 'इरुञ्जालक्कुडा' इत्यस्मिन् पुरे निवासी । चिरात् मम तस्य च परिचयो वर्तते ।

श्यामार्यः—तथा नु । मलयाले किं वाणिज्यवृत्तिर्भवान् ?

मान्त्रिकः—न मे वाणिज्यं किमप्यस्ति । मान्त्रिकोऽहम् ।

श्यामार्यः—ओहो ! तथा नु । तथा चेत् स किमद्यापि भवत्पुर एव वर्तते ?

मान्त्रिकः—न न । अत्र आगतः । क्वचित् गूढे स्थले वर्तते ।

श्यामार्यः—तेन सह के चान्ये वर्तन्ते ?

मान्त्रिकः—न खलु यः कोऽपि वर्तते ।

श्यामार्यः—कयाचित् कन्यया हि वर्तितव्यम् ?

मान्त्रिकः—कन्या कुत आगच्छेत् ? भवान् हि पञ्च सहस्राणि रूप्याणि गृहीत्वा भवतोऽन्नप्रदं स्वामिनमेव वञ्चितवान् ? तत्सङ्गमाभिलाषिणीं कन्यां नु भवान् प्रैषयत् ?

तदाकर्णितवान् त्रस्तो विभ्रान्तश्च श्यामार्यः 'किं वृत्तम् । कन्या कुत्र अगच्छत् ?' इत्यवादीत् ।

मान्त्रिकः, 'किं सङ्गतिः कापि भवतो न विदिता ? इमं लेखं भवान् पश्यतु । भवत्प्रेषितायाः कन्याया योग्यता, भवदीयं कर्म कथमवसितमिति च ज्ञायेता'मिति वदन् कञ्चन लेखं ददौ । श्यामार्यः अत्यौत्सुक्येन तं जग्राह । लेखं धारयतस्तस्य हस्तः अकम्पत । मन आकुलीबभूव । स एकः क्षणः एकं युगमभासत । स तमुद्घाट्यापठत् । सपदि तस्य मुखं विकृतिमभजत । स किमपि वक्तव्यममन्यत । वाक् अस्खलत् । 'तथा चेत् किं कन्या आत्मानमपमोच्य गताऽभूत् ? स्वामिनः श्वशुरगृहे नु वर्तते ?' इत्यवदत् ।

मान्त्रिकः—आम् ।

श्यामार्यः—तथाचेत् विषयः प्रकटीभूतो हि भवेत् ।

मान्त्रिकः—अद्यावधि न प्रकटोऽभूत् इतो दिनद्वये प्रकटो भवेत् ।

श्यामार्यः— प्रकटश्चेत्

मान्त्रिकः—युष्माभिः त्रिभिः कारागृहस्यान्तर्गन्तव्यमेव । अनन्तर-विषयः— किं भवान् सामान्यं कार्यमकरोत् ? पणं गृहीत्वा स्वामिनं हि चत्वरे आकृष्टवान् ।

श्यामार्यः—(प्रकम्पितः) एवं वर्तेतेति नैवाहमाचिन्तयम् । अद्यात कां आलोचनां कृतवन्तः स्थ ? स्वामिनः आपत्परिहाराय यत् किमपि कर्तुं न मे कश्चित् प्रतिबन्धः । अपेक्षायां प्राणानपि दातुं सज्जः ।

सद्यः मान्त्रिके 'इदं पश्यतु भवान् । इमं लेखपत्रं यक्षिणी-देवताद्वारा पालककार्यालयात् आनाययम् ।' इत्यपरं काकदं प्रसा-रितवति, श्यामार्यः महता औत्सुक्येन तमादाय पठित्वा पूर्वा-धिकां भीतिं विभ्रमं च प्राप । 'किमेतत् । स्वामिनः श्वशुर एव हि व्यवहारपत्रं लिखितवान् । अत्र किमस्माभिः कर्तव्यम् ?' इत्युवाच । तावत् तस्य मनसि कोटिशः चिन्ताः प्रादुर्भूय विलिलियिरे । तत् मिथ्या सत्यं वेति सन्दिदिहे । तत्र पालकमुद्रां स्थितामपश्यत् । तेन यक्षिणीदेवताबलादेव आगतेन भाव्यमिति दृढं मेने । मन्त्रवा-दिनि महान् बहुमानः भीतिः विनयश्च तस्य अजायन्त । स किं वक्ष्यतीति सोत्सुकं प्रतीक्षांचक्रे । मान्त्रिकः किञ्चिन्निदध्यौ ; 'एतदर्थं अद्य रात्रिं कृत्स्नां श्मशाने शवस्योपरि उपविष्टः मन्त्रं जप्त्वा बलिं दत्वा यक्षिणीं प्रादुर्भाव्य वशीकरणं प्रयोक्ष्ये । अनेन तस्य श्वशुरः पत्नी च तस्य वश्यौ भवेताम् । मेनकाभिधाना ब्राह्म-णकन्या च व्यामुग्धा तं भजेत । न सा इतःपरमस्मिन् पुरे स्थाप-यितव्या । अनन्तरनौकायां स्वामी तां शिङ्गपुरं नीत्वा तत्र स्थाप-यिष्यति । इत ऊर्ध्वं सा अस्मिन् पुरे त्रीन् मासान्, शिङ्गपुरे त्रीन् मासांश्च वत्स्यति । यतः स तां 'घोषा' स्त्रीवन्नेष्यति ततः न को-ऽपि तामवधास्यति । इयं सेति न कोऽपि उपलप्स्यते । अपि तु

इत्याह (अकिञ्चिदिति) किञ्चित्कारिणः यत्किञ्चिदनुकूलव्यापारकर्तारः। यत्किञ्चिदपि कुर्वाणो विष्णोरायतने वसेदित्युक्तत्वात्। तद्विरुद्धाः अपकारिणः, विरोधार्थे नञ्। दीनैः तदपेक्षया दुर्बलतमैः, ततोपकृतैः आकृष्टानि अनन्यगतिकतया उच्चैरुद्धुष्टानि गुणाः कर्माणि च स्तुतिव्यञ्जकानि येषां ते, तैर्विमथितास्तदीयगुणकर्माण्यभिलष्य विलपन्तीत्यर्थः। तदसन्निधानस्थले वास्तवासद्गुणकर्मादिकमुद्धुष्य दूषयन्तीति वा। तादृशहिंसाकरणे हेतुः (गतसत्त्वानामिति) गतं अविद्यमानं नष्टं वा सत्त्वं सत्वगुणः सत्पुरुषधर्मो वा येषां तेषां रजस्तमोऽभिभूतसत्त्वगुणानामिति यावत्। दृष्टस्पृष्ट्यादिकं (दर्शनस्पर्शनादिकं) आदिशब्दात् आसनाच्छायनादित्युक्तसर्वविधसंसर्गपरिग्रहः अघाय दुःखाय पापाय वा भवति। संक(्?)मन्ति हि पापानि तैलबिन्दुरिवाम्भसीत्यनुशासनात् पापजनकत्वं सुव्यक्तम्। पापिनां नृशंसानां दर्शने सति तेषामप्येतद्दर्शनावश्यंभावात् ततोपकारः कश्चिदवश्यं पर्यवस्येदिति भावः। यद्वा दर्शनस्य स्पर्शनं दानं, स्पर्शनं प्रतिपादनमित्यमरकोशात्। अतः स्वदर्शनप्रदानमपि दुःखायेति न दोषः। तथा च परस्परदर्शनपरिहारोऽवश्यकर्तव्य इति फलितार्थः। अंहोदुःखव्यसनेष्वघमित्यमरः।

एवमेव लुब्धशिरोमणिपरतयाप्यर्थः—

गतसत्त्वानां, अमनस्कानां प्राणे बलेऽन्तःकरण इति कोशात् सत्त्वशब्दस्य मनःपरत्वम्। द्रविणसम्पन्नत्वेऽपि तत्कणिकामप्यदित्सूनां लुब्धानां अकिञ्चित्कारिणां परोपकारविरहिणां निष्प्रयोजनपुरुषाणां दीनैः दरिद्रशिरोमणिभिः आकृष्टानि उच्चैरुद्धुष्टानि गुणकर्माण्यारोपितानि येषां तेषां दरिद्राणां धनिकसामान्ये त्वमिन्द्रश्चन्द्र इत्यादिस्तोत्रकरणमानुभाविकमिति भावः। कदाचिदयमपि यत्किञ्चिद्दद्यादिति भ्रान्तिरेवात्र मूलमिति द्रष्टव्यम्। तेषां दर्शनं स्पर्शनं च अघाय दुःखाय पापाय वा। तेषां दर्शने च याच्ञादिप्रवृत्त्युदयात् तद्विघाते च दुःखजननमवश्यंभावि। पापं च

तद्दर्शनादौ, क्षुध्यानामन्नदानादिकं विना स्वमात्रभोजनेन 'गृहस्थधर्मो यो विप्रो ददातिपरिवर्जितः । ऋषिभिर्धर्मतत्त्वज्ञैरपचःपरिकीर्तितः ॥ इति अपचत्वावसायात् 'परपाकनिवृत्तस्य परपाकरतस्य च। अपचस्य च भुक्त्वान्नं द्विजश्चान्द्रायणं चरे'दित्युक्तप्रत्यवायप्राप्त्या। तेषां पापित्वं तावदवर्जनीयम्। पापिनां दर्शनस्पर्शनादिसम्पर्कस्य पापापादकत्वं प्रसिद्धमेवेति । श्रूयते हि पापित्वं केवलादिनः श्रुतावपि 'नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी' इति । केवलादी स्वमात्रं भुञ्जानः । स केवलं पापी भवतीत्यर्थः । अत एवोच्यते— 'धनवन्तमदातारं दरिद्रमतपस्विनम् । कण्ठे बध्वा शिलां गुर्वीं सिन्धुमध्ये विनिक्षिपेत् ॥' इति । यद्वा अघानां पापानां आयेन प्राप्त्या गतसत्त्वानां विनष्टमनस्कानां, 'पापं प्रज्ञां नाशयती'त्युक्तेः, दर्शनस्पर्शनादि कं प्रतीत्यन्वयः कं पुरुषार्थमुद्दिश्येत्यर्थः । निष्फलपुरुषदर्शनं किमर्थमिति यावत । अथ वा स्पर्शनं दानं अमनस्कात् प्रतिग्रहोऽपि दोषाय समनस्कस्य तूष्णींभावस्ततोऽपि श्लाघ्य एवेति वक्ष्यते।

एवं मृतपरतयाप्यर्थः—

गतसत्त्वानां नष्टप्राणानां, द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुष्वित्यमरः । अकिञ्चित्कारिणां हस्तपादादिचलनाभावात् उन्मेषनिमेषादिस्वभावजकर्मकरणस्याप्यनर्हाः दीनैः विलपद्भिर्बन्धुवर्गैः आक्रुष्टानि उच्चैर्बुध्यमाणानि गुणाः कर्माणि च पूर्वानुभूतानि येषां तेषां मृतपुरुषस्तुतेस्सर्वत्र दृष्टत्वात् तेषां दर्शने स्पर्शनेप्यघं भवति आशौचं जायते । तथा च स्मृत्यन्तरं उह्यमानं शवं दृष्ट्वा सवासा जलमाविशेत् । अलंकृतं शवं दृष्ट्वा सचेलस्नानमाचरेत् ॥ आचम्य केवलं प्रेतं दृष्ट्वा काष्ठवदाचरेत् । काष्ठवदाचरणं जलावगाहनम् । मनुश्च असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् । विशुद्ध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान् ॥ वसिष्ठोऽपि 'मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचमस्निग्धे त्वहोरात्रम्' इति । तथा च स्नानादिप्राप्त्या आशौचसत्त्वमवर्जनीयमिति भावः ।

एवमेव अबलपरतयापि बोधः—

तत्र च प्राणे बलेऽन्तःकरण इति कोशात् सत्वशब्दो बलपरः ; तथा च गतबलानां दीर्घरोगिणामासन्नमरणानां उत्थानगमनादिकार्यकरणेऽप्यक्षमाणां, दीनैः आर्तस्वैरः, आक्रुष्टानि दूषितानि, गुणानां पाचकादीनां कर्माणि यैस्तेषां अरोचकादिपीडिताः पाचकादिषु दोषमारोपयन्तीति प्रसिद्धमेव, तेषां दर्शनमपि दुःखजनकं मुमूर्षुत्वात् स्पर्शने च देहपीडासम्भवादतिव्यसनमवश्यंभावीति भावः ।

एवं सत्त्वशब्दस्य जनपरतया—

महाव्याध्यादिना विनष्टजनानां नगराणां दर्शनं स्पर्शश्च महादुःखायेत्यप्यर्थः । तेषु च जनप्रचारविपणिवीथिकाव्यवहरणादिकिञ्चित्कारो नास्ति अवशिष्टजनैर्दीनैः पूर्वमृतगुणकर्माण्याक्रुश्यन्त इति च ।

एवं गतसत्त्वानां प्राप्तजन्तूनां गर्भिणीजनानामित्यपि बोधः । गतश्रीः प्रतिष्ठाकाम इत्यत्र प्राप्तश्रीरित्यर्थकरणात् । अतश्चापन्नसत्वानां यत्किञ्चिदपि गृहकृत्यादिकं कर्तुमसमर्थानां दीनस्वरैराक्षिप्तानि गुणानां स्वशेषभूतानां दासजनानां कर्माणि यैस्तेषां स्वकार्यालस्यात् शश्वत् परिजनाधिक्षेपो भवतीति भावः । दर्शने च तेषां कथमियमशक्ता सुखं प्रसूय स्वस्था भविष्यतीति स्पर्शे च गात्रपीडा भवेदिति दुःखजननमवश्यंभावीति भावः । केषांचित् क्रूरदृष्टीनां दर्शनं दोषाय च भवतीति वा पूर्णगर्भस्त्रीविषय इति बोध्यम् ।

एवमेव दुष्टजन्त्वाक्रान्तपिशाचाद्याविष्टपरोऽप्युन्नेयः—

सत्वोऽस्त्री जन्तुषु क्लीं तु व्यवसाये पराक्रमे । आत्मभावे पिशाचादौ द्रव्ये सत्तास्वभावयोरिति वैजयन्तीकोशात् । ते च स्वशक्त्या स्वबुद्ध्या वा किञ्चित् कार्यं कर्तुमसमर्थाः, दीनस्वरैः उच्चैरुद्घोषयन्ति च पुरोवर्तिनां गुणकर्माणि पिशाचग्रस्ताः मान्त्रिकादिताडने स्वगुणकर्माणि च कथयन्तीति प्रसिद्धमेवेति बोध्यम् ।

एवं सत्त्वशब्दस्य व्यवसायपरत्वे—

व्यवसायात्मिका बुद्धिरेकेह कुरु नन्दनेत्युक्त एकबुद्धिरहिताऽव्यवस्थितचित्तपरोऽप्यर्थः । ते च शश्वत् पिशुनजनकलहात् किञ्चिदप्यनुकूलं कर्तुमशक्ताः । किञ्चित्क्षणानुकूल्यादौ आचरितसद्गुणकर्माणि दीनजनाः प्रतिपदं कीर्तयन्ति । उपकारलाभार्थमिति तेषां दर्शनादिकमपि 'अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः' इति न्यायेन दुःखजनक इत्यर्थः ।

एवमसत्पदार्थपरतयाप्यर्थः—

असत्पदार्थाश्च शशशृङ्गमरीचिकाजलादयः । तत्रासत्ख्यातिपक्षे असतां ज्ञानविषयत्वं पक्षान्तरे विकल्पादिवृत्तिविषयत्वं चाभ्युपेयत इत्यन्यदेतत् । सर्वत्र तेषामर्थक्रियाकारित्वविरहात् अकिञ्चित्कारित्वं सुव्यक्तम् । तृष्णार्थीनां मरीचिकादर्शने जलभ्रान्त्या तत्समीपानुधावनं, तत्र जलानुपलम्भे विसंस्फुलतरतरङ्गसङ्कुलो जलप्रवाहोऽद्य मया दृष्ट इत्याक्रोशश्च तद्गुणकर्मणामानुभाविक एव । अतश्च तद्दर्शनतद्देशस्पर्शनादिकं दुःखायैव भवतीदशायेति ध्येयम् ।

एवमकालग्रहणपरोऽपि—

ते च अकिञ्चित्कारिणः किञ्चिदपि स्नानदानादिकं न कारयन्तीति तथोक्ताः अकालग्रहणे स्नानाद्यविधानात् । दीनैः मन्दीभूतैः सूर्यसम्पर्कादहश्यरूपैः राह्वादिभिः आक्रुष्टः आच्छादितः गुण औष्ण्यादिः कर्म तेजोविसरादि च येषां तेषां गतसत्त्वानां प्राप्तराह्वादिजन्तूनां, दर्शस्य अमावास्यायाः न स्पर्शनं स्पर्शाभावः नसमासः, आदिना पौर्णमास्यसंस्पर्शो गृह्यते । अथाय अनिष्टायैव भवति । अपर्वणि ग्रहो यत्र तमसा चन्द्रसूर्ययोः । अमेघे जलवर्षं च रात्राविन्द्रधनुस्तथा । बालमीनांश्च सन्दृष्ट्वा तं देशं परिवर्जयेत् । इत्युत्पातगणेषु परिगणनादिति भावः ।

एवमसद्ग्रहपरश्च कश्चिदर्थः—

गतसत्त्वानां दुष्टनीचादिग्रहसम्बन्धात् षष्ठाष्टमाद्यवस्थानात् तत्तदा-

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम्।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २१] कलि ५०४८ सर्वजित् { मकर— साधारण सं ५ कुम्भ— शास्त्रानु- [बन्धः सं ६

# महद्दैवतम् ॥

"ननु महते दैवतायेति महादेवः प्रतीयते । मैवम् । समस्तस्यैव तथा रूढत्वात् । व्यस्तस्य नामधेयतया अहिर्बुध्न्यविश्वेदेवादिवत्संज्ञायामलुक्त्वेन वा प्रसिद्ध्यभावात् । तदभावेऽपि तत्प्रत्यभिज्ञया तत्प्रतीतिर्जायत इति चेन्न । व्यस्तत्वेनैव संज्ञात्वे अप्राकृतनिरुपाधिकमहत्त्वदेवतात्वयोः 'वेदाहमेतं पुरुषं महान्तं' 'तेजः परस्यां देवतायां'मित्यादिप्रतिपन्नपरमात्मपरमपुरुषविषयत्वौचित्यादेवात्र रूढ्यास्पदमहादेवप्रत्यभिज्ञाप्रतिरोधात् । 'नारायणमुपागमत्' 'ध्यायन्नारायणं देवम्' 'श्रीमत्यायतने विष्णोः' इत्यादिपूर्वापरविरोधाच्च । बोधायनीयादिषु महादेवशब्दस्य व्यस्तोऽपि रुद्रे प्रयोगः सम्प्रतिपन्नो दृश्यत इति चेत् सत्यम् । प्रकरणादिवशात्तु तत्र तथा निर्णयः । अत्र तद्विपरीतमेव । किं च महते दैवतायेति दैवतशब्दोऽत्र प्रयुज्यते न तु देवशब्दः । न हि महादैवतमिति रुद्रस्य नाम । अपि तु महादेव इति । अतोऽत्र भगवच्छास्त्रादिप्रसिद्धमग्निमध्यगतस्य भगवतः समाराधनमेवोच्यते ।"

इतीमाः श्रीदेशिककृतौ सच्चरित्ररक्षायां स्थिताः पङ्क्तयः यथावस्थितार्थप्रतिपत्त्यर्थमत्र व्याख्यायन्ते । 'महते दैवतायाज्यं जुहाव ज्वलितेऽनले' इति रामायणश्लोके महते दैवतायेति परमपुरुष उच्यत इति सिद्धान्तः ।

अत्र पूर्वपक्षमाह— नन्विति । अयमभिसन्धिः । महादेव इति रुद्र उच्यत इत्यत्र न संशयलेशोऽप्यस्ति । देव एव देवता । 'देवात्तल्' इति स्वार्थे तलो विधानात् । देवतैव दैवतम् । प्रज्ञादित्वेन स्वार्थिकाण्करणात् । तथा च देव इति दैवतमिति नास्ति कश्चिद्विशेषः । एवं समासविरहोऽप्यकिञ्चित्करः । अर्थस्यैकत्वात् । इत्थं च महादेवपदश्रवणे यथा रुद्रस्य प्रतीतिः तथैव प्रकृते महते दैवतायेति श्रवणस्थलेऽपि ।—इति । तदिदं 'ननु महते दैवतायेति रुद्रः प्रतीयते' इत्याद्यनुक्त्वा 'महादेवः प्रतीयते' इति विशिष्य महादेवपदमुपाददानैराचार्यचरणैः सुस्फुटमावेदितम् ।

इमं पूर्वपक्षं निरस्यति—मैवमिति । देवदैवतपदयोरविशेषं पूर्वपक्षाभिमतं तथैव कृत्वा, 'महादेवः प्रतीयते' इति यदुक्तं तत्र प्रतीतिः किं रूढिजन्या विवक्षिता उत रूढिं विनैव यथाकथञ्चिज्जायमाना इति विकल्पमभिप्रेत्य नाद्य इत्याह—समस्तस्यैवेति । तथा रुद्रविषयतया । रूढत्वात् रूढिमत्त्वात् । एवकारेण असमस्तव्यवच्छेदः । असमस्तं न तथा रूढम् । असमस्तं चेह विद्यमानम् । तेन रूढिजन्या प्रतीतिरत्र नास्ति । समस्तस्येव असमस्तस्यापि कुतो न रूढिरित्यत्राह—व्यस्तस्येति । महादेव इति रुद्रनामसु कोशकारैः पठ्यते 'वामदेवो महादेवः' इति । न चैवं महान् देव इति । तस्मादिह नामधेयतया प्रसिद्धिर्नास्ति । अहिर्बुध्न्यविश्वेदेवादिशब्देषु संज्ञायामलुगिति वैयाकरणेषु प्रसिद्धिरस्ति । न चैवं प्रकृते । तस्मादसमस्तस्य रूढत्वमप्रामाणिकमिति ।

अथ द्वितीयमाशङ्कते—तदभावेऽपीति । नामधेयतया वा संज्ञायामलुक्त्वेन वा प्रसिद्ध्यभावेऽपीत्यर्थः । तत्प्रत्यभिज्ञया महादेवशब्दवाच्यरुद्रप्रत्यभिज्ञया । तत्प्रतीतिः रुद्रप्रतीतिः । जायते महते दैवतायेत्याभ्यां पदाभ्यामुत्पद्यत इत्यर्थः । व्यस्तेन समस्तोपस्थापनद्वारा रुद्रप्रतीतिर्जन्यत

इत्यभिप्रायः । निरस्यति—नेति । उपपादयति—व्यस्तत्वेनैवेति । (अत्र समञ्जसः पाठोऽन्वेष्टव्य । 'व्यस्तत्वेनैव संज्ञात्वे अपाकृते निरुपाधिक...' इति स्थितं कृत्वा वयं व्याचक्ष्महे । अन्यथा 'संज्ञात्वे' इत्यस्य सर्वथाऽनन्वयात् । ) व्यस्तमपि यदि संज्ञा स्यात् तर्हि तया झटिति संज्ञिन उपस्थित्या स एवार्थो ग्राह्यः नान्य इति स्यात् । तत्तु नास्ति । समस्तस्यैव संज्ञात्वात् । व्यस्तत्वेनैव संज्ञात्वापाकरणात् । एवं सति यत् सदृशशब्दवाच्यतया महादेवोपस्थित्या स एव ग्राह्य इत्युच्यते, तदयुक्तम् । महते दैवतायेति पदद्वयश्रवणसमनन्तरं तद्वाच्ययोर्महत्त्वदेवतात्वयोरुपस्थितौ उपाधिविशेषाश्रवणेन अनुपाधिकत्वे तयोः सिद्धे तदाश्रयतया परमपुरुषोपस्थितौ तस्यैव ग्रहणेनार्थान्तरानपेक्षणात् । न च वाच्यं वैपरीत्यं कुतो न भवतीति । श्रुतेन शब्देन स्वार्थे उपस्थापिते सति तत्पर्यालोचनवशेनैव अपेक्षितविशेषनिर्णये पुनः परावृत्य शब्दसादृश्यपर्यालोचनलभ्यस्यार्थस्य बहिरङ्गत्वात् । देवतात्वयोरिति । अनेन देवतात्वपदप्रयोगेण, तेजः परस्यां देवतायामिति देवतापदघटितप्रमाणोपन्यासेन च देवदेवतादैवतशब्दानामविशेषं कृत्वैवायं विचारः प्रवर्तत इति स्फुटं जायते ।

एवं महत्त्वदेवतात्वयोः न्यायलभ्यं निरुपाधिकत्वमाश्रित्य कृतं निर्णयमुक्त्वा अर्थान्तरोपस्थापकप्रकरणादिरूपप्रबलप्रमाणसत्त्वे न्यायलभ्यं निरुपाधिकत्वमनाश्रित्य सोपाधिकमहत्त्वादिविशिष्टमर्थान्तरमपि गृह्येत । तादृशं तु प्रकरणमिह नास्ति । प्रत्युत विरुद्धं प्रकरणमस्तीत्यभिप्रेत्याह—**नारायणमुपागमदित्यादि** । अत्र अभिप्रायमगृह्णन् पूर्वपक्षी रुद्रपरतया निश्चितं व्यस्तप्रयोगं दर्शयन् तद्बलेन व्यस्तस्यापि रूढत्वमङ्गीकार्यमित्यभिप्रेत्याह—**बोधायनीयादिष्विति** । रुद्रपरतया व्यस्तप्रयोगसद्भावमङ्गीकरोति । सिद्धान्ती—**सत्यमिति** । न तु तावता रूढिः सिद्ध्यतीत्यभिप्रेत्य तत्र रुद्र-

SANSKRIT VIDYAPEETHA TIRUPATI.

परत्वापादकं प्रमाणं विशदीकुर्वन्नाह—प्रकरणादीति । प्रकृते तथाविध-प्रमाणविरहं तद्विरुद्धसिद्धान्तानुकूलप्रमाणसद्भावं च पूर्वाभिप्रेतं स्फुटीकरोति अत्रेति । तत् प्रकरणादि । विपरीतं पूर्वपक्षाभिमतार्थविरोधि । वाक्या-न्तरजन्योपस्थित्यनुवृत्तिः प्रकरणम् । समानवाक्ये पदान्तरेणोपस्थितिः सान्निध्यपरपर्याया, एवंविधं नियामकं प्रमाणान्तरं च आदिपदेन गृह्यते ।

एवं देवदैवतशब्दयोरविशेषं कृत्वा सिद्धान्तमुपपाद्य सम्प्रति प्रकृत-पूर्वपक्षस्यातिफल्गुत्वप्रदर्शनार्थं तत्त्वमुद्घाटयति—किञ्चेति । संज्ञाभूतं यत्समासपदं तदवयवभूते एव पदे व्यस्ततया प्रयुक्ते स्वारब्धसमासोप-स्थापनद्वारा संज्ञिनमुपस्थापयत इति कदाचिच्छङ्क्येतापि । इह तु व्यस्त-तया श्रुते ये 'महते दैवताये'ति पदे न ते संज्ञाभूतसमस्तपदावयवभूते । महादैवतमित्यस्य संज्ञात्वाभावात् । संज्ञाभूतं तु महादेवपदं न तदारब्धम् । संज्ञात्वं हि अक्षरानुपूर्वीसंश्रयं तद्भेदे व्यपैति । न हि भीमसेनपदं संज्ञेति भीमसैन्यपदमपि तथा भवति । तदयमत्यन्तफल्गुः पूर्वपक्ष इति भावः । अत्राहुः— इयान् विस्तरोऽत्र अनपेक्षितः ।

'नन्वत्र महते दैवतायेति महादेवः प्रतीयते । मैवम् । दैवतशब्द-स्यैव सत्त्वेन देवशब्दाभावात् । अथ कथञ्चित् तत्प्रतीतिसम्भवेऽपि रुद्रप्रत्यायकप्रकरणाभावाच्च ।'

इति 'पङ्क्तिद्वयेन' समापनीयोऽयं वादः वृथैवं वर्धितः— इति । अस्य 'पङ्क्तिद्वयस्य' प्रौढशास्त्रग्रन्थान्तर्भावौचित्यं प्रति वयं सांशयिकाः । दैवत-शब्द एवात्र वर्तते । न देवशब्द इति हि पूर्वपक्षिणोऽपि प्रत्यक्षमेतत् । तथाऽपि 'महादेवः प्रतीयते' इति वदतस्तस्य नूनं कश्चिदभिप्रायो वाच्यः । कः सः । कथमत्र तन्निरसनम् । न हि 'ननु घट इति पटः प्रतीयते । मैवम् । घटशब्दस्यैव सत्त्वात् । पटशब्दस्यासत्त्वात्' इत्येवं शङ्कासमाधाने

क्वचित् प्रवर्तेयाताम् । 'अथ कथञ्चित् तत्प्रतीतिसम्भवेऽपि' इत्यप्ययुक्तम् । तत्प्रतीतौ सम्भूतायां प्रकरणस्यानपेक्ष्यत्वेन तदभावस्यादोषत्वात्, अवक्तव्यत्वात् । अथोच्यते—इदं 'पङ्क्तिद्वयं' परित्यज्यताम् । श्रीदेशिकग्रन्थे किञ्चेत्युपक्रान्तो यश्चरमो भागः तेनैव पूर्वपक्षनिरासस्सम्भवे ततः प्राक्तनो भागस्सर्वोऽनपेक्षित इत्येषाऽस्माकं शङ्का समाधेया— इति । अत्र ब्रूमः ।

1 यथा महादेवशब्दः रूढ्या रुद्रमाह न तथा व्यस्तं पदद्वयम् । रूढिरत्र नास्ति ।

2 महान् देवः इत्यादि व्यस्तं पदद्वयं अर्थान्तरपरत्वग्राहकप्रकरणादिविरहे निरुपाधिकमहत्त्वादिविशिष्टं परमपुरुषमेवाभिदधाति । यथा 'महो देवो मर्त्यां आविवेश' इत्यादौ । महच्छब्दस्यैव वैदिकरूपं मह इति ।

3 अर्थान्तरप्रकरणादिसत्त्वे आपेक्षिकमहत्त्वादिविशिष्टमर्थान्तरमप्यभिदधाति । यथा बोधायनीयादिषु ।

4 महती देवता महद्दैवतमित्यादिष्वपीदमित्थमनुसन्धेयम् । समासेऽप्यत्र न रूढत्वमिति विशेषः ।

इत्येवं नीतिविशेषाधीननिष्कर्षविशेषकरणेन महाफलः स भाग इति । एवं निरूपणस्य महाविषयत्वसिद्ध्यर्थमेव देवदैवतादिपदाविशेषमभ्युपेत्यैव समाधानं प्रथमं कृतमित्यपि ज्ञेयम् । नन्वेवं व्यस्तं यदि रूढ्या रुद्रं नाभिदधाति कथं तर्हि

नमति महति देवे नाकसिन्धोर्विशीर्णाः ।
बिभर्ति रङ्गेश्वरपादरक्षे देवो महान् दर्शितसन्ततिस्त्वाम् ।

इति पादुकासहस्रे व्यस्तप्रयोगः तस्मिन्नर्थे कृत उपपद्यते । न ह्यत्र प्रकरणात् सोऽर्थो लभ्यत इति सुवचम् । पादुकाविषयत्वात् प्रकरणस्य ।

प्रकरणान्तरस्य चाभावात् । उच्यते । प्रकरणादीत्यादिपदग्राह्यं प्रमाणान्तरमिह रुद्रपरत्वं निश्चाययति । नाकसिन्धोरिति गङ्गाया उपस्थितेः यस्य शिरसि गङ्गा स इह महान् देव इति सुस्पष्टमेतत् । एवं 'मुहुरहिपतिचूडामौलिरत्नाभिघातात्' इत्यनन्तरपादार्थपर्यालोचनयापि तथा निश्चयः । एवं श्लोकान्तरेऽपि 'आपूरयिष्यन्नवतंसचन्द्रम्' इत्येतत् तत्र प्रमाणम् ।

यत्तु नानार्थकसैन्धवादिपदप्रयोगस्थलं चेत् प्रकरणवशादर्थनिर्णय इति तन्न । सामान्ये श्रुते विशेषनिर्णयस्यापि प्रकरणाद्यधीनत्वात् । 'अथ प्रजानामधिपः प्रभाते' इत्यादौ प्रजानामधिपो दिलीपः, जाया सुदक्षिणा, ऋषिः वसिष्ठः, धेनुर्नन्दिनीत्येषां विशेषाणां प्रकरणादेव निर्णयात् । एतेन 'वर्षासु पङ्कजगणध्वनिरुज्जिहीते' इत्यत्र पङ्कजपदेन मण्डूकाभिधानं प्रकरणवशादितिवदिदमिति प्रत्युक्तम् । पङ्कजपदस्य पद्मे रूढत्वात् । अर्थान्तरप्रतीतिप्रतिरोधात् । रूढ्यर्थं परित्यज्य अर्थान्तरविवक्षया तथा प्रयोगस्य निहतार्थत्वरूपदोषग्रस्तत्वात् । प्रकृते रूढ्यभावेन अनुपपत्तिलेशस्यापि विरहात् । किं च अत्यन्तविषमो दृष्टान्तः । महान् देव इत्यत्र हि रुद्ररूपे यस्मिन्नर्थे रूढिः परैराशङ्क्यते तस्यैवार्थस्य प्रकरणलभ्यत्वं सिद्धान्तिभिरुच्यते । न चैवं दृष्टान्ते । मण्डूकानां प्रकरणलभ्यत्वकथनात् । तेषु रूढः पङ्कजपदस्य कैरप्यनिष्टेः । अर्थान्तरे च पद्मे अस्य पदस्य रूढत्वादित्यास्तामेतत् । स्थितं तावदिदं यन्निरवद्या देशिकश्रीसूक्तिरिति ।

तमः सूर्ये विषं चन्द्रे शीतत्वमनले भवेत् ।
न त्ववद्यं क्वचित् किञ्चिद्भवेद्देशिकसूक्तिषु ॥

हितं परेषां हृदये निधाय
सौजन्यतः सर्वमिदं वदामः ।
फलत्यथैतत्र विपरीतमेव
गतिर्विचित्रा जगतां विधातुः ॥

# परिपन्थिशब्दः ॥

(V. R. Srinivasa Tatacharya Siromani)

(अनुवृत्तः)

तत्र नारीवास्तव्यशब्दयोः व्युत्पत्त्यन्तरेण तस्य समर्थनं, "वस्तुतः इदं गणसूत्रमनार्षं नुर्नरस्य च धर्म्या नारीति 'ऋतोऽञ्' इति सूत्रेण 'नरस्ये चेति वक्तव्यं' इति वार्तिकेन चाद्युदात्तनार्यास्सिद्धेः। रूढ्या योग्यतया तद्धर्म्या नरत्वजातिविशिष्टैव बुद्ध्यते। अत एव 'वसेस्तव्यत्कर्तरि णिच्च' इति वचनं वास्तुनि भवो वास्तव्य इति दिगादित्वात् संसाध्य प्रत्याख्यातं भाष्ये । नित्यानां शब्दानां यथाकथञ्चिदन्वाख्यानं कार्यमिति कैयटः। रूढ्या सर्वदोषपरिहार इति तदाशयः।" इति 'नृनरयोर्वृद्धिश्च' इति गणसूत्रशेखरेऽपि स्फुटम्। कौमुद्यां "निपूर्वात्स्यादेव 'तेन न तत्र भवेद्विनियम्यं' इति वार्तिकप्रयोगात् ... ... नियमे साधुरिति वा" इति ग्रन्थेन वार्तिकप्रयोगात् कृद्यदन्तस्य नियम्यशब्दस्य साधुत्वमुक्त्वा तद्धितयदन्ततयापि तस्य साधुत्वमलभ्यत । यद्यपि विनियाम्यमिति पदमञ्जरीसम्मतवार्तिकपाठे नियम्यशब्दसाधुत्वसिद्धौ नियमे साधुरित्येकैव व्युत्पत्तिरुपायः । नेयमन्या व्युत्पत्तिः । तथापि कौस्तुभतत्त्वबोधिन्यादिषु 'केवलाद्यतं कृत्वा निशब्देन समास इत्यन्ये । यद्वा 'यमोऽपरिवेषणे मित्' इति मतमाश्रित्य 'पर्यवसितं नियमयन्' इत्यादाविव मित्त्वं स्वीकृत्य ण्यन्ताद्यत् बोध्यः । अथवा संज्ञापूर्वकविधेरनित्यत्वात् ण्यत्येव वृद्धिर्न प्रवृत्तेति दिक्' इति ग्रन्थेन कृद्यां यण्ण्यद्भ्यां नियमे साधुरित्यर्थे तद्धितयता च नियम्यशब्दस्य साधनमस्त्येवेति नियमे साधुरिति कौमुद्युक्तं व्युत्पत्त्यन्तरं भवत्येव। कौस्तुभादिषु सखेत्याख्यातः सखिः पतिरित्याख्यातः पतिः तेन सखिना पतिना आख्यातण्यन्तात्कर्मणि 'अचइः' इत्यौणादिक इप्रत्ययः । लाक्षणिकत्वाच्चैतयोर्घिसंज्ञापर्युदासे ग्रहणं नास्तीत्येवंरीत्या व्युत्पत्त्यन्तरेण सखिपतिशब्दयोस्साधुत्वस्य समर्थनं दृश्यते।

छान्दसानां केषांचित् व्याकरणग्रन्थेषु व्युत्पत्त्यन्तरेण भाषायां साधुत्वेन समर्थनस्य दर्शनेऽपि परिपन्थिशब्दस्य छान्दसस्य तेन तत्र तस्य समर्थनं न दृश्यत इति तेन तस्य तत्समर्थनमयुक्तमिति न शङ्कनीयम्। वयस्यास्वित्यादिसूत्रकौस्तुभे छान्दसा अपि भाषायां क्वचित्प्रयुज्यन्त इति ज्ञापनेन समर्थितसाधुभावयोः तुरापाट्परिपन्थिशब्दयोर्मध्ये तुरापाट्

छब्दस्य 'छन्दसि सह' इत्यादिषु कौस्तुभादिषु व्युत्पत्त्यन्तरेण साधुत्वस्य समर्थनात् स्थालीपुलाकन्यायेन परिपन्थिशब्दस्यापि व्युत्पत्त्यन्तरेण साधुत्वेन समर्थनस्य दीक्षितसम्मतत्वागमात् तदात्मजभानुजिदीक्षितविरचितसुधायां कल्पद्रुमादिषु च व्युत्पत्त्यन्तरेण तत्साधुत्वसमर्थनस्य दर्शनाच्च । व्युत्पत्त्यन्तराश्रयणे छन्दसिपरिपन्थीति सूत्रे परिपन्थिशब्दनिपातनवैयर्थ्यं प्रसजतीति न चोदनीयं, रात्रीशब्दगिरिशशब्दादिष्विव छान्दसलौकिकयोः परिपन्थिशब्दयोः स्वरभेदाश्रयणेन इनिप्रत्ययान्तपरिपन्थिशब्दनिपातनस्य साफल्यात् । रात्रीशब्दस्य लोकवेदयोः स्वरभेदवत् गिरिशशब्दस्यापि तयोः स्वरभेदमुपपाद्य 'अचो यत्' इति सूत्रकौस्तुभे "एतेन 'गिरौ डश्छन्दसि' इति वार्तिकप्रत्याख्यानपरं भाष्यमप्यपास्तम्" इति प्रत्यपाद्यत । एतद्भाष्यमेकदेश्युक्तिरिति 'गिरौ डश्छन्दसि' इति वचनं स्वरार्थमावश्यकमिति च कौस्तुभाशयः । परिपन्थिशब्दस्य लोकवेदयोः स्वरभेदानङ्गीकारेऽपि तन्निपातनं सफलमेव अभिमतलक्ष्यासाधकत्वगतार्थत्वादिहेतुभिः 'न बहुव्रीहौ' 'विभाषा द्वितीयातृतीयाभ्याम्' इत्यादीनां बहूनां सूत्राणां 'अटि' इत्यादिसूत्रावयवानां 'वसेस्तव्यत्कर्तरि णिच्च' 'संज्ञोपसर्जनप्रतिषेधो वक्तव्यः' इत्यादीनां वार्तिकानां च भाष्यकृता प्रत्याख्यानेऽप्यदृष्टार्थत्ववत् अस्याप्यदृष्टार्थत्वसम्भवात् । महाभाष्ये छन्दसि परिपन्थीति सूत्रव्याख्यानानुपलम्भात् न तद्विरोधोऽत्र शङ्कितुं शक्यः । न च सुधायुक्तरीत्या णिनिप्रत्ययान्तपरिपन्थिनशब्दाभ्युपगमे पथिधातोरप्रातिपदिकत्वेन तद्धितप्रत्ययाप्राप्तावपि कृत्प्रत्ययसम्भवेन पन्थशब्दस्य निष्पत्त्या तमादाय पान्थपन्थकपान्थायनपारिपन्थिकशब्दसिद्धौ 'पन्थोण नित्यम्' 'पथः पन्थ च' 'पथः पन्थ च' 'परिपन्थं च तिष्ठति' इति सूत्रेषु प्रत्ययसन्नियोगेन पन्थादेशनिपातनं व्यर्थमिति शङ्क्यम् । सुधादिषु पन्थयतेश्चौरादिकादेव णिनिप्रत्ययाश्रयणेन तस्मादेव कृत्प्रत्ययान्तरस्य वक्तव्यतया तत्स्वीकारे 'ण्यासश्रन्थो युच्' इति घञाद्यपवादयुच्प्रत्ययस्य प्रवृत्तौ पन्थनेति, ण्वुलि तु पन्थक इत्येवं रीत्या विलक्षणरूपस्य सिद्धेः। अर्थस्वरादिभेदाच्च पन्थेति निपातनं सफलमेव । पथिधातोरिदित्वेन णिचो वैकल्पिकत्वेऽपि अण्यन्तात् 'गुरोश्च हलः' इत्यप्रत्यये टापि पन्था इति सिद्ध्येन न तु विलक्षणरूपार्थस्वरसहितः पन्थशब्दः । पन्थादेशस्य निपातने तु स्थान्यर्थाभिधानसमर्थस्यैवादेशत्वमिति सिद्धान्तात् मार्गप्रत्ययो भवति । रूपवरौ च भवतः। ऋजवस्सन्तु पन्थाः इत्यत्र जसस्स्थाने सोरुरीकारे पूर्वोक्तपन्थाशब्दप्रयोगोररीकारे रूपभेदाभावेऽपि 'पथिमथो-

स्सर्वनामस्थाने' इति सूत्रविहितानुदात्तस्य पथिन्शब्द एव प्रवृत्त्या अत्र प्रवृत्त्यभावेन पथिन्शब्दसमानार्थत्वाभावेन च स्वरार्थयोर्भेदस्स्यादेव । माधवीयधातुवृत्तौ तु 'पथः पन्थश्च मार्गस्स्यात्' इति त्रिकाण्डशेषपाठो यदि भवति तदा पन्थशब्देनानेन सिद्धौ पन्थादेशनिपातनं विफलं स्यात् । अतः तत्र पन्थशब्दपाठोऽप्रामाणिक इत्यभण्यत । रूपार्थादिसाम्यात् तदुक्तं निपातनवैफल्यं युज्यत एव । तद्वासनया ण्यन्तपथिधातुघटित-कृदन्तरूपेण तन्निपातनवैफल्यप्रसञ्जनं पूर्वोक्तरीत्या नोचितमित्यादिकं स-हृदयैराकलनीयम् । अत्र अकारान्तपथशब्दपाठस्तु 'त्वचि त्वचः किरोपि-स्यात् किरौ प्रोक्तः पथः पथि' इति द्विरूपेषु विश्व' इति प्रौढमनोरमादिग्रन्थ-सम्प्रतिपन्नग्रन्थान्तरसम्मत एवेति पूर्वं न्यरूप्यत । वशधात्वादयश्छा-न्दसाः व्युत्पत्तिरहिताश्च । अतः प्राचीनैः ज्ञापकेन साधितेन नव्यवैया-करणदूषितेन छान्दसा अपि भाषायां क्वचित्प्रयुज्यन्त इत्यनेन लोके तत्प्रयोगस्य साधुत्वं कथञ्चित्सम्पादनीयम् । परिपन्थिशब्दस्य तु बहु-विद्वत्सम्मते व्युत्पत्त्यन्तरे जागरूके वशधात्वादिवत् तस्य लोके कथ-ञ्चित् साधुत्वेन समर्थनं न सङ्घटीति । तस्मात् भाषायां प्रयुक्तस्सर्वो-ऽपि परिपन्थिशब्दः पूर्वोक्तसुधायुक्तव्युत्पत्त्यैव साधुभावमर्हति ।

---

षेक्स्पिअर् - कृतं

# यथाभिमतम् ॥

सिलिआ—अयि स्वसः,

अहं पिता चेत् किमिदं विदध्याम् ?

आर्लण्डो—एषोऽस्मि रोलन्दकनिष्ठपुत्रभावेन तृप्तो न च तामभिख्याम्
विपर्यसिष्यम्यहमस्य राज्ञो दायादता यद्यपि मे ततः स्यात्

रोसलिन्द्—प्राणप्रियो मे पितुरास रोलन्द्
लोकश्च सर्वोऽर्चति तं स तद्वत् ।

युवैष तस्यात्मज इत्यहं चे-
दज्ञासिषं नूनमुदश्रुनेत्रा

समुत्सुकं साहसकर्मणीमं
न्यवारयिष्यम्.

सिलिआ— स्वसरत्युदारे
इमं समभ्येत्य सभाजयेम
प्रोत्साहयेम. प्रतिपत्तिरेषा
तातस्य रूक्षा च करोत्यसूया—
पूर्णा च चित्तं मम शल्यविद्धम्.
त्वमार्य बर्हसि साधुवादं
तर्कातिलङ्घी सकलो गुणस्ते ।
कृतां प्रतिज्ञां यदि कामभोगे
त्वं पासि धन्या दयिता तव स्यात् ॥

रोसलिन्द्— उदार सत्पूरुष
(स्वकण्ठात् हारमवमुच्य तस्मै ददती)
धारय त्व-
मिमं ममार्थे विधिवञ्चितायाः.
दद्यामितोऽप्यभ्यधिकं न चाहं
शक्तास्मि ; किं याम पितृव्यपुत्रि ?

सिलिआ— आम् । सौम्य भूयाः सुखजीवितस्त्वम् ।

आलिण्डो— वाच्यो मया किं न कृतज्ञभावः ?
श्लाघ्यो ममांशः सकलो विनष्टः ।
इहाद्य यत्तिष्ठति सा हि चञ्चा
विचेतना केवलपिण्डमूर्तिः ॥

रोसलिन्द्— आवामसावाह्वयति ; प्रनष्टं
सहैव भाग्येन हि गौरवं मे ।
प्रक्ष्यामि किं नाम स वाञ्छतीति
भवान् किमाकारयति स्म मान्य ॥

त्वं मल्लयुद्धं निपुणं व्यतानीः
आक्षिप्तवानस्यपरं * च शत्रोः ॥

सिलिआ— अयि त्वमागच्छ पितृव्यपुत्रि ।

रोसलिन्ड्— त्वय्येव संरक्ष † ; सुखी त्वमेधि ।

आर्लण्डो— का चित्तवृत्तिर्नु ममाविजिह्वं
इमं महान्तं निदधाति भारम् ?
अहं न शक्तः प्रतिभाषितुं तां
तथाऽपि सम्भाषणतत्परा सा ॥
बत त्वमार्लन्द निपातितोऽसि ;
यद्वा स चार्लेस् स्ववशे करोति
किञ्चित् ततो दुर्बलमेव वा त्वाम् §

---

* मम हृदयमपरं अपहृतवती इति भावः । तस्मिन् स्वानुरागमेवं अतिनिपुणं व्यञ्जयति ।

† हारस्त्वय्येवास्तु न मे प्रत्यर्पणीय इति प्रत्यर्पणाय प्रवृत्तं प्रत्याह ।

§ मन्मथगोचरपतितत्वमात्मनो ज्ञापयति ।

# रक्ष कृपालो ॥

रक्ष कृपालो ! रक्ष कृपालो ! मां तव दासं रक्ष कृपालो ।
निखिलजनार्तिप्रशमनदक्षं त्वामहमीडे राधाजानिम् ॥

मधुमुरकैटभकंसविनाशी विकसितनीलोत्पलदलनेत्रः ।
यदुकुलतिलकस्त्रिभुवनभर्ता पायान्नित्यं देवः श्रीशः ॥

सर्वसुरासुरपूजितपादं नीरदनीलं केलिविलोलम् ।
नन्दकुमारं सुन्दरमूर्तिं राधावल्लभमयमहमीडे ॥

तोण्डमूले नारायणभट्टः

# सरससंवादः॥

(T. E. Viraraghavacharya Siromani)

**मनोहरास्यं हरिशोकतत्त्वं संवादरूपं गुरुशिष्ययोर्द्वौ।**
**दृष्ट्वा वयस्यौ सुविमर्शदक्षौ सम्भाषणाद्दर्शयतोऽर्थतत्त्वम्॥**

एकः—सखे, 'जीवानुप्रवेशेषु शोकादयो जीवांशगताः साक्षादवतारेष्वभिनयमात्रम्' इत्यन्तरधिकरणटीकायां व्यासार्या निरणैषुः। सूक्तिरियं स्मारिता च भवता **वात्सल्यचन्द्रिकायाम्**। कुतोऽद्यापि तौ, गुरुशिष्यौ 'हरेरद्वारकस्तात्त्विक एव शोको जायते' इति वादं न मुञ्चतः।

अन्यः—वयस्य, सूक्तिरियं व्यासार्याणां, कृन्तत्येव तयोर्हृदयम्। अथापि भट्टार्यैः 'विकर्तृ' नाम भाष्ये 'स्वार्थहर्षशोकाद्यभावेऽपि परार्थतत्प्रसक्तिरदोषः। अन्यथा परदुःखदुःखित्वादयो गुणाः कथमस्य स्युः' इत्युक्तमास्थाय स्थाने खलु तयोर्वादस्थितिः।

एकः—आभ्यामेव लेखद्वारा समादिष्टो भवान् अमृतलहर्यां ईश्वरशोकविमर्शनाख्यं व्यासं प्राचीकशत्। तत्र उदाहृतभट्टार्योक्तेः निर्वाहः प्रादर्शि। उद्यानपत्रिकायां च तदविपाः समुचितं योजनान्तरं प्रादर्शयन्। उभयत्राप्यर्थतत्त्वं सुस्थम्। व्यासार्योक्तिश्चानुसृता भवति। कुतो गुरुशिष्यौ नाद्रियेते?

अन्यः—स्वसम्प्रदायनिष्ठैः पूर्वैरद्वारकं दुःखाधारत्वमेव प्रतिपन्नं भगवत इति तावभिमन्येते। महाचार्याणां चण्डमारुतोक्तिरियं तयोरालोकं जनयिष्यति। इत्थं हि सा—

'सर्वाधारे ब्रह्मणि दुःखाधारत्वसत्त्वेऽपि येन सम्बन्धविशेषेण दुःखाधारता जीवे तदतिरिक्तेनैव सम्बन्धेन ब्रह्मणो दुःखाधारत्वात् यथा जीवो दुःखी न तु ब्रह्मेति व्यवस्था, न तु दुःखस्य कार्यान्तरहेतुत्वाहेतुत्वाभ्यां

एवमज्ञानमपि येन सम्बन्धेन जीवे वर्तते तेन सम्बन्धेन ब्रह्मणि नेत्येव सर्वज्ञत्वाज्ञत्वव्यवस्था वक्तव्या .... दुःखित्वादुःखित्वादिव्यवस्थापकतया क्लृप्तसम्बन्धभेदेनैव तद्व्यवस्थोपपत्तौ तदन्यस्यापि व्यवस्थापकत्वकल्पनायोगात्' इति

एकः—हन्त ! महदिदं सामरस्य सौवादवं भाग्यवशादद्यानुभाव्यमासीत् । उद्बोधकवशादन्यदपि स्मृतिपथमायाति—

'स्वदुःखं यदि जानाति नारभेत परः पुमान् ।
यदि नैव विजानाति नारभेत परः पुमान् ॥'

इति वादान्तरेऽप्युक्तं शतदूषण्याम् । चण्डमारुते च—'स्वदुःखज्ञाने तन्नोत्पादयेत् । स्वदुःखत्वेनाज्ञाने सार्वज्ञ्यं हीयेते'ति भाववर्णनं कृतम् । तत्र तत्रैवमादिवचनैरुद्धारकदुःखवादं महाचार्या अपि प्रत्याचख्युः ।

अन्यः—अनन्तार्यैः सिद्धान्तसिद्धाञ्जने— प्रमेयत्वव्यापकानुकूलत्वप्रकारकसाक्षात्कारवत्त्वमेव समानभोगत्वं मुक्तेश्वरयोः' इति 'न रोगं नोतदुःखताम्' इत्येतच्छ्रुत्यर्थवर्णनपूर्वकं सयुक्तिकं समर्थितमस्ति । तदपि लहर्यां प्रादर्शि मया प्रागेव ।

एकः—प्रियसख, दुःखशालिताप्यानन्दमयत्वस्यैव भिदा । कल्याणगुणः आनन्दः परदुःखाधीनदुःखवत्त्वं चेति पर्यायाः इति सिद्धान्तयतो गुरुशिष्यौ । 'आनन्दत्वं नाम कात्स्न्र्येनानुकूलत्वम्' इति तत्त्वत्रये लोकाचार्याः । अनुकूलत्वम्, आह्लादकरत्वम्, इति श्रीमद्वरवरमुनीन्द्रविवरणम् । परदुःखाधीनानन्दवत्त्वमेव परदुःखदुःखित्वमिति साधु समर्थयतः सिद्धान्तम् । संज्ञामात्रे हि विवादः नार्थशरीरे ।

अन्यः—'पुरुषानुकूलं सुखं तत्प्रतिकूलं दुःखमिति हि सुखदुःखयोस्स्वरूपविवेकः' इति जिज्ञासाधिकरणे श्रीभाष्यम् । दुःखमप्यानन्दविशेषः इति मन्यमानावेतौ उल्लोकशास्त्रजल्पौ शोच्यौ ।

एकः—'परदुःखनिराचिकीर्षा नाम भगवतः कोऽपि गुणः । न पुनर्दयास्वरूपं तत्' इति शिष्यो गायति, गुरुः विस्मयते ।

अन्यः—

1 'आपन्ने रक्षितव्यत्वधीर्दया' इति बृहस्पतिस्मृतिरन्ववादि दशनिर्णये । इच्छा हि धीरेव ।

2 'दयाभूतहितैषित्वं' इति व्यासस्मृतिरुदाहारि स्मृतिरत्नाकरे ।

3 'दयालुं, परदुःखप्रहरणपरम्' इति मल्लिनाथः ।

4 'परदुःखापहरणेच्छु कृपावान्' इति प्रतापरुद्रीयव्याख्यायां तत्पुत्रः ।

5 'स्वार्थानवेक्षपरदुःखनिराचिकीर्षा कारुण्यम्' इति यतीन्द्रमतदीपिका ।

6 'कृपापरदुःखापचिकीर्षा' इति मुमुक्षुप्पडि व्याख्यानटीकायां शुद्धसत्त्वं स्वामिनः । अतः परदुःखदुःखित्वं भगवतस्सद्वारकमेव । परिणामवत् । बहुस्यामित्युक्तबहुत्ववत् । काठिन्यवान् यो बिभर्ति, श्वेतो भगवान् इत्यादिवच्च । इदं चेत् दयापदार्थः सद्वारकमेव दयावत्त्वं भवति भगवतः । इच्छारूपा असहिष्णुतारूपा च साक्षादेव हरेः । इति समञ्जसम् ।

---

कश्चन राजा । स कश्चन स्वप्नमपश्यत् । तस्य सर्वे दन्ताः पतिता अभवन् । एकं ज्योतिश्शास्त्रविदमाहूय अपृच्छत्—किमिदं सुनिमित्तं, उत दुर्निमित्तमिति । सोऽब्रवीत् 'दुर्निमित्तमेवैतत् । भवतः पूर्वमेव भवत्पुत्रपौत्रादयः सर्वे मरिष्यन्ती'ति । कुपितो राजा तमदण्डयत् । अथान्यमाहूय अपृच्छत् । सोऽब्रवीत्— 'दीर्घायुर्भवान् । सर्वान् बन्धूनतिजीविष्यति । अतः सुनिमित्तमिदम्' इति । परितुष्टः किल राजा इमं बहुधा मानयामास । यथा शास्त्रज्ञानं तथा जडानामाराधनज्ञानमपि लोके अवश्यापेक्षितम् ।

TIRUPATI

Registered No. M 2300.

Book XXI ॥ श्रीः ॥ Nos. 7 & 8

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २१] कलि ॥ ५०४८ सर्वजित् मीन .... साधारण सं ४
५०४९ सर्वधारि मेष .... शास्त्रानुबन्धः सं ४
आहत्य ,, ८

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

March & April 1948

## विषयाः ॥

शास्त्रानुबन्धः—
कुवलयानन्दः । [बुधरञ्जनीसमेतः] २३७—२४४

1 मेनका ।
2 सुभाषितनीवी ।
3 गुणशिक्षा ।
4 समासे भवतीशब्दः ।
5 यथाभिमतम् [नाटकम्]
6 गैर्वाण्यां गद्यकाव्यम् ।
7 भङ्गलक्षणम् ।
8 पुस्तकपरामर्शः ।
9 प्रतिबोधनम् । [in the wrapper]

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription    Re. **One** only.
Do. With Sanskrit Supplement    Rs. 2—0—0

उद्यानपत्रिका ॥

अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।

कन्यामासे साधारणसञ्चिका अनन्तरमासे शाखानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविडया वा न तु भाषान्तरेण)।

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari Panditaraja* **D. T. Tatacharya Siromani M. O. L.**
Lecturer, Sri Venkateswara College,
TIRUPATI.

SANSKRIT VIDYA PEE...
TIRUPATI

यदि दैवगत्या नाथि वा शिक्रपुरे वा यः कोऽपि तां हिन्दु स्त्रीमुपलभेत, स्वामिनः आपत् सम्भवेत् । तदर्थं अहं स च कामव्यालोचनां कृत्वा इदमेकां मातृकां सज्जीकृतवन्तौ स्वः । तथा विलिख्य भवता पेरुन्देव्या च दत्तहस्ताक्षरं लेखं भवता दीयमानमादाय आगन्तुं मामादिशत् । प्रायः अयं लेखः नोपयोक्ष्यते । अथापि आवश्यकं होतत् यत् पूर्वसंविधानरूपमिदं हस्ते रक्ष्यत इति ।' इत्युदीरयामास ।

सपदि श्यामार्यः ईषदप्यनालोच्य मान्त्रिकेण दत्तां मातृकां गृहीत्वा पठित्वा 'साधु । इदं नु महत् कार्यम् । तथैव लिखित्वा दास्यामः । अत्रैव भवान् तिष्ठतु । अहं गत्वा द्रं प्रतिनिवर्तिष्ये ।' इत्युक्त्वा उत्थाय अनन्तरं गृहं गत्वा वृत्तान् विषयान् सर्वान् पेरुन्देव्यम्बा, कोमला, आभ्यां द्वाभ्यामावेद्य अतीव सन्तापयति, लेखं विलिख्य दातुं ते अपि सम्मतिमकुरुताम् । मान्त्रिकेण दत्तां मातृकां श्यामार्ये वाचयत्येव सति, कोमला काकदान्तरे तथैव आलिखत् ; तत्र पेरुन्देव्यम्बा हस्ताक्षरं निदधौ । अधस्तात् श्यामार्योऽपि हस्ताक्षरं दत्वा तदादाय स्वगृहमागत्य तत् मान्त्रिकाय अदात् । तद्गृहीत्वा पठित्वा तृप्तिं प्राप्तो मान्त्रिकः तद्वेष्टयित्वा स्वकञ्चुकभस्त्रायां निदधौ । श्यामार्याय नैतामहम्मदेन लिखित्वा प्रेषितं लेखं, पेरियतम्बिनरकास्य व्यवहारपत्रं च गृहीत्वा कञ्चुकभस्त्रान्तर्निधाय, 'साधु । स्वामी प्रतिपालयन् वर्तेत । अहं गच्छामि । श्वः सर्वं कार्यं तृप्तिकरं पर्यवसितं भवेत् । सलाम्' । इत्यभिधाय उदतिष्ठत् । श्यामार्योऽपि तस्मै सलामकरोत् । सद्य उत्थाय बहिर्गतो मान्त्रिकः पुनरपि देहलीमागत्य 'आर्य, अपरमपि विषयं प्रष्टव्यमवादीत् । तं व्यस्मार्षम्' इत्यवोचत् ।

श्यामार्यः सोत्सुकं 'को विषयः' इत्यब्रवीत् । मान्त्रिकः "कन्यायाः पेटिकायां किल यूयं नाटककारेण लिखिताविव द्वौ लेखौ लिखित्वा न्यक्षिपत । स कदाचित् विषयं बहिः प्रकाशयेदिति

स्वामी बिभेति । स यदि त्वया प्रकाशयेदिति सम्भाव्यते तस्य नाम कथ्यताम् । अद्यैव रात्रौ मारणमन्त्रं जप्त्वा तं हन्मि" इत्यवदत् । तदाकर्णितवान् श्यामार्यः, 'न न । तत्प्रति भीतिरेव मा भूत् । तल्लेखकः नान्यः कश्चित् । ममानुज एव । प्राणापायेऽपि न स तत्त्वं प्रकाशयिष्यति । स्वामिनि धीरं ब्रूत । स कुत्र निलीनो वर्तते ? तत्प्रकाशं किं अहमप्यागच्छानि ?' इति जगाद ।

मान्त्रिकः 'सः श्वः प्रातः स्वगृहमेव प्रकाशमागतो भविष्यति । गृहमेवागत्य भवता द्रष्टुं शक्यः । इदमेकं दिनं क्षमतां भवान् ।' इति वदन्नेव बहिर्गतोऽभूत् । सर्वे विषयाः तृप्तिकरं वृत्ता इत्येतत् प्रति बहु सन्तुष्टः श्यामार्यः मध्याह्नभोजनाय गृहान्तरं गतोऽभवत् ।

तस्य गृहान्निर्गतो मान्त्रिकः गङ्गैकोण्डान्-मण्टपस्य पुरतः पर्यावृत्य शिङ्कराचारि-वीथ्यां किञ्चिद्दूरं गत्वा ततः वेङ्कटाचल-श्रेष्ठि-वीथ्या अन्तः प्राविशत् । तत्रत्यान् बहून् प्रासादान् अत्यक्रामत् । ततः परस्तात् स्थिते कस्मिंश्चिद्गृह एव पालकप्रत्यवेक्षकः समयसञ्जीव्यार्यः वासमकरोदिति ज्ञातत्वात् सः तस्य गृहस्यान्तः प्रविश्य देहलीमतीत्य अपवरके तिष्ठन् 'शामि, शामि' इत्याजुहाव । 'कः सः' इति पिककूजितमिव कस्याश्चित्कन्यायाः ध्वनिः अन्तःप्रदेशे अश्रूयत । अनन्तरक्षणे स्वर्णप्रतिमाकारा यौवने स्थिता काचन कन्यामणिः मान्त्रिकस्य पुरतः प्रादुरासीत् । तस्या अष्टादश वयांसि स्युः । हेम्नि, रत्नवेणी, पट्टचेले, मल्लीमुकुळसदृशेषु दन्तेषु च ज्योतिर्मयतया द्योतमानेषु पुरतः प्रादुर्भूय दर्शनं दत्तवत् तन्मधुरं रूपं दृष्टवान् मान्त्रिकः स्मितं कृत्वा 'प्रत्यवेक्षकः स्वामी किमस्ति ?' इत्यपृच्छत् । तदाकर्णितवती सा समयसञ्जीव्यार्यस्य पत्नी तं आरूढावरूढं निर्वर्ण्य, 'नास्ति । पालकस्थानके वर्तते । को भवान् ?' इति बहुगम्भीरमभाषत । मान्त्रिकः तदधिष्ठितां शालामभिवीक्ष्य स्मित्वा चरन्नेव 'न ह्यार्यः स्थानके वर्तते । अद्य सः अत्रैवास्त इति ह्यवादिषुः ।' इत्यब्रवीत् । तस्य मुखे खलस्वाभाव्यं स्मितं

च प्राकाशेताम् । तस्य वाचं श्रुतवती सा किञ्चित् क्रुद्धा अधि-क्षेपिणि ध्वनौ 'सोऽत्र नास्त्यार्य, इति वदामि । उपर्युपरि किल भवान् पृच्छति । किन्तु तं कुम्भे निरोधाय निहितवत्यः स्मः । गच्छत्वार्य भवान् बहिः । अपावृते गृहे 'कोऽपि' प्रविशेदिति वदन्ति । तद्वत् किल शालामागतवान् भवान् । केवलग्रामीणो हि भवान् भवति' इत्यभणत् । तच्छ्रुतवान् मान्त्रिकः तत् कर्णे अगृहीतवानिव नाटयित्वा विश्रान्ते विश्रान्ते पश्यन् 'नाम्ब । न कोपः कार्यः । नाहं आर्यस्य सकाशे कार्येण आगतोऽस्मि । अम्बायाः सकाश एव कार्येण आगमम् । मलयाळमान्त्रिकोऽहम्' इत्युवाच ।

तदाकर्णितवती अम्बा पूर्वाभ्यधिकं क्रुद्धा 'किं भवानद्य गृहाद्बहिर्गच्छति । किं वा नियोगकरमाहूय 'मर्यादां' कृत्वा प्रेषयाणि' इत्यवदत् ।

सपदि मान्त्रिकः सानुनयं सविनयं च भाषितुमुपक्रम्य "स्वामिन्यां सम्यक्त्वं सम्मानं लब्ध्वा गन्तुमागतोऽस्मि । को नु नियोगकारो मां नेष्यति । स्वामिन्या उत्तमो गुणः । पुरःक्रोधः परं किञ्चिदधिकः । परन्तु श्वेतं सर्वं क्षीरम् । अलिनं सर्वं जलम्' । तज्ज्ञानस्यैव आर्यः स्थानकं गच्छामीत्युक्त्वा वञ्चयित्वा प्रकाशे दिवाकाले गणिकायाः ज्ञानाम्बाया गृहं गतवान् । 'स्वामिन्या आर्यस्य चास्मिन् विषये अस्ति वैमनस्यमित्यहं जानामि । वशीकरणौषधकरणे अहं कृतहस्तः । इदमेकमञ्जनं ददामि । तद्यदि अत्रभवती भ्रुवि लिम्पति अनन्तरक्षणे आर्यः भवतीपादमूलं प्राप्य शरणागतिं कुर्यात् । सद्य इद परीक्षितुं शक्यम् ।" इति दृढमुवाच । आर्यस्य चरितं प्रति वस्तुतोऽम्बायाः चिराय जातशङ्कत्वात् तस्याः क्रोधः सपदि शशाम । भर्ता सद्यो वशीकर्तव्य इति मेने । 'यावत् तदञ्जनं मम भ्रुवोर्वर्तते तावदेव हि स मे वचने तिष्ठेत् । तन्मा भूत् । इतः परं सर्वदा तेन मयोच्यमानं कर्तव्यम् । अन्यस्यां यस्यां कस्यामपि तेन प्रेम न कर्तव्यम् । उत्तिष्ठेति ममादेशे उत्थातव्यम् । उपविशेति

चेत् उपवेष्टव्यम् । तादृशमौषधमस्ति चेत् दीयताम् । भवतोऽपे-क्षितं वित्तं सद्यो ददामि ।' इत्युवाच । अम्बा अनायासेन स्ववशं गतेति पश्यन् मान्त्रिकः 'अभिमन्त्रितं किमपि मूलं मयि वर्तते । तदिदानीमेव ददामि । मङ्गलसूत्रे तद्बध्यताम् । अनन्तरक्षणं आर्यः किं करोतीति पश्यत । अपि तु न मे वित्ते स्पृहा' इत्यब्रवीत् । अम्बा—तथा चेत् किमप्यगृहीत्वा निष्कामं करोमीति किं भवानाह? मान्त्रिकः—वेतनं विना किं कर्मास्ति, अम्ब ? अत्रभवत्या आविदितं किमस्ति ?

अम्बा—तर्हि मम देहे स्थितेषु आभरणेषु यत् किमप्यपेक्षितं दास्यामि। किं स्वर्णवलयमपेक्षते भवान् ? किं वा स्फटिकताटङ्कम् ?

मान्त्रिकः— सम्यक् कार्यमकार्षं । ताटङ्कमूल्यं रूप्यसहस्रद्वयम् । भवदीय आर्य एव प्रत्यवेक्षकः । तस्मिन् वशं गते अहं ताटङ्कं चोरितवानिति कथयित्वा ताटङ्कमपि गृहीत्वा मां च कारागृहं प्रवेशयितुं नु वाञ्छथ ? ताटङ्कं प्रदाय पश्चात् आर्य आगत्य यदि पृच्छति केति किं वक्ष्यथ ?

अम्बा—(स्मितं कृत्वा) एषु विषयेषु पुरुषान् वञ्चयितुं स्त्रियः किं न जानन्ति ? अभ्यञ्जनाय अवमुच्य न्यधाम् । काकोऽपाहरदिति वदिष्यामि । एतदर्थं चतुःपञ्चानां प्रहाराणां पातेऽपि पञ्चभिर्निमेषैः वेदना शमिष्यति । कार्यं चेन्निष्पद्यते तदेव पर्याप्तम् ।

मान्त्रिकः— (स्मित्वा) अम्बा बहुतन्त्रशालिनी । ताटङ्कलाभश्च मे मा भूत् । तेन अम्बायाः क्लेशश्च मा भूत् । प्रेम्णा मामालिङ्ग्य द्वे चुम्बिते मे दत्त । अन्यत् किमपि मा भूत् । सद्योऽहमार्यं वश्यं करिष्यामि ।

अप्रतीक्षितां जुगुप्सितां तां वाचं श्रुतवती अम्बा घोरा व्याघ्रीव सीत्कृत्य उन्ननाम । 'अरे सम्मार्जनि, किमात्थ ? गृहात् किं बहिर्गच्छसि । किं वा गोमयं विलाप्य अभिषेकं करवाणि ? अरे को नु बहिः नियोगकारी ?' इत्युच्चैरक्रन्दत् ।

चिपत्यादेश्च विनष्टशुभभावानां बुधजीवादीनाम् । उच्यते हि शुभग्रहाणामपि पापत्वमुक्तनिमित्तेषु ; स्वफलप्रदानाशक्तिश्च, 'क्षीणेन्दुरर्कार्किभूपुत्राः पापास्तत्संयुतो बुधः' इत्यादिषु । 'मन्दसौम्यसिताः पापाऽशुभे गुर्वादिवाकरौ । न शुभं योगमात्रेण प्रभवेच्छशिजीवयोः ॥ परं तु तेन जीवस्य पापत्वमपि सिद्ध्यति' इति च जातकचन्द्रिका । अकिञ्चित्कारिणां स्वफलप्रदानासमर्थानां दीनैः नीचीभूतैः दुर्बलग्रहैः आक्रुष्टानि आक्षिप्तानि, सोऽपि साक्रोश एवेति प्रयोगदर्शनात् ; गुणाः उच्चस्वस्थानादयः कर्माणि च तत्तत्फलप्रदानरूपाणि येषां तेषां तादृशशुभग्रहाणामपि दर्शनं वीक्षणं स्पर्शनं एकस्थानसम्बन्धः आदिपदात् एकांशसम्बन्धादयो गृह्यन्ते । अपाय दोषायैव भवति । अनिष्टफलदायकत्वादिति भावः ।

एवं लुब्ध वैदिकपरोऽपि—

गतसत्त्वानां आत्मभावशक्तिरतश्रद्धाशून्यानां अकिञ्चित्कारिणां लोभादिना किञ्चिदपि प्रधानकर्म ज्योतिष्टोमदर्शपूर्णमासादिकं कर्तुमनिच्छूनां दीनैः दुर्बलकारणैरित्यर्थः, यागादिकरणस्य समीचीना ऋत्विजो न लभ्यन्ते । निर्दुष्टद्रव्यादिकं च दुर्लभमित्यादिव्याजोक्तिभिरन्ततः कार्यारम्भं परिहरतामित्यन्वयः । अत एव आक्रुष्टानि निरस्तानि गुणकर्माणि अप्रधानकर्माणि येषां तेषां प्रधानकर्मणोऽकरणे गुणकर्मशक्तिरताङ्गकर्मणां स्वतो निरासादिति भावः । तेषां दर्शनस्पर्शनादिकं सदा सिद्धान्तग्रन्थपठनादिकं अपाय दोषायैव वेदाध्ययनकल्पसूत्रपारायणादीनां क्रत्वनुष्ठानैकफलकत्वात्, इष्ट्वा च विविधैर्यज्ञैर्मनो मोक्षे निवेशयेदिति विधानाच्च तदभावे शास्त्रस्पर्शो निन्दाया एवेति भावः ।

एवं गतसत्त्वानां शुद्धसत्त्वशून्यानां प्राकृतपदार्थानां दर्शनं अनुभवः स्पर्शनं संसर्गः आदिशब्देन तदुपासनादिश्च अपाय कर्मणे भवति ।

भगवत्सङ्कल्पत एव तस्य निरसनीयत्वात् । ते च पदार्थाः यत्किञ्चित् अनुकूलं कर्म कर्तुमशक्ताः दीनबुद्धिभिः अविवेकिभिः आकृष्टानि, प्रफुल्लतरतरुषण्डादिमण्डितवसन्तोद्यानवापिकादिदर्शने उच्चैरुद्घुष्टानि तदीयगुणकर्माणि येषां तथोक्ता इति च । तथा च मूढजना एव प्रकृतिसंसर्गे मोमुह्यमानास्सुखायन्ते । विवेकिनस्तु सर्पसहवासवत् नित्यं तच्चिन्तने दुःखायन्त एवेति भावः ।

एवं जैनबौद्धविश्वखण्डकादिपरोऽपि कश्चिदर्थः—

गतसत्त्वानां सत्त्वन्नाम व्यवस्था सन् स्थिरः तस्य भाव इति व्युत्पत्तेः तच्च गतं विनष्टं जैनानां तन्मते हि सर्वत्र सप्तभङ्गयवतारात् सर्वेषामपि पदार्थानां सत्त्वमसत्त्वं सदसत्त्वं सदसद्बहिर्भूतत्वमित्यादयः परिगृहीता इति नैकस्वरूपता केषामपीति भावः । तदुक्तं भक्ष्याभक्ष्यस्वपरविजयस्थापनादूषणादिष्वैकान्त्यं ये जहति विहितिं क्वापि नैते विदन्तीति । तुरीयबौद्धाश्च सर्वशून्यवादाश्रयणात् सत्पदार्थानभ्युपगमाद्गतसत्त्वाः । अन्येऽपि विज्ञानमात्रसत्यत्ववादेऽपि तस्य स्थैर्यरूपसत्त्वानुपगमेन गतसत्त्वा एव । विश्वखण्डकोऽपि दुर्युक्तिभिस्सर्वमपि वस्तु दुर्निरूपमिति वदन् गतसत्त्व एव । ते सर्वेऽप्यकिञ्चित्कारिणः केवलं वैतण्डिकत्वेन स्वपक्षे किञ्चिदपि स्थापनमकुर्वाणाः दीनैः दुर्बलतर्कैः स्वव्याघातकत्वात् प्रत्यक्षागमादिविरोधाच्च दुर्बलत्वं, आकृष्टानि निरस्तानि गुणाः कर्माणि च यैस्तथोक्ताश्च । विश्वखण्डकेन गुणादीनां द्रव्यात् भेदे अभेदे च दूषणोद्गारात माध्यमिकैर्वस्तुस्वरूपानभ्युपगमात जैनैश्च गुणसमुदायरूपमेव द्रव्यमिति उपगमाच्चेति भावः । एवं वाङ्मात्रेण निरस्यन्ति गुणादीन् । स्वस्य केनचिच्चपेटाहतौ च तदानीं नीलवर्णोऽयं पुरुषो मामताडयदिति तद्गुणकर्माणि राजादिसन्निधावुच्चैराक्रोशन्ति । दीनस्वरैरिति चार्थः । अतश्च प्रत्यक्षस्वानुभवविरुद्धोऽयं दुर्वाद

इति भावः। अत एवोच्यते—'परस्परविघट्टनत्रुटिततर्कशस्त्रच्छटातिरस्कृत-चमत्कृतिस्स्वयमखण्ड वैतण्डिकः' इति। तेषां दर्शनादिकमपि दोषायैव। अत एवोक्तं विवेकमहाराजेन,—'सेनापते, आः कष्टममीषामालोकनं उत्सार्यन्तामेते दृष्टिगोचरा'दिति। यद्वा तेषां दर्शनस्य शास्त्रग्रन्थस्य स्पर्शनादिकं हस्तस्पर्शपठनादिकमपि प्रत्यवायैवेति भावः॥ ९॥

---

निगिरन्तो जगत्प्राणानुद्गिरन्तो विषं मुखैः।
दूरतः परिहर्तव्या द्विजिह्वा जिह्मवृत्तयः॥ १०॥

तदेवमुक्तश्लोकैः दुर्जनसंसर्गस्य दृष्टादृष्टप्रत्यवायभूयिष्ठत्वमुपपाद्य सर्वप्रयत्नेन तत्संसर्गः परिहरणीय इत्याह निगिरन्त इति। जगतां प्राणान् असून्, बलानि वा, अर्था बहिश्चराः प्राणा इत्युक्तान् धनादिरूपान्वा, निगिरन्तः भक्षयन्तः,अन्यदीयवस्तून्यपहृत्य यथेच्छं भक्षणेन तत्प्राणादीनां विनाशो भवतीति भावः। मुखैः अनेकप्रकारैः मुखभेद इत्यादिप्रयोगात् विषं विषतुल्यं क्रूरकर्म उद्गिरन्तः असकृदुत्पादयन्तः मरणान्तव्यापारकरणलेलुपा इति यावत्। उक्तं हि— 'तक्षकस्य विषं दन्ते मक्षिकायाश्शिरो विषम्। वृश्चिकस्य विषं पुच्छे सर्वाङ्गे दुर्जने विषम्॥' इति। यद्वा मुखैः स्वमुखैः बहुवचनं व्यक्तिभेदेन; विषतुल्यं क्रूरवचनमुद्गिरन्तः उच्चैर्घोषयन्तः। उक्तं हि—अहमेव गुरुस्सुदारुणानामिति हालाहल मा स्म तात दृप्यः। ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन् वचनानि दुर्जनानामिति। अथवा साक्षाद्विषमेवोद्गिरन्तः; तदप्युक्तम्—'प्रागर्णवस्य हृदये वृषलक्ष्मणोऽथ कण्ठेऽधुना वससि वाचि पुनः खलाना'मिति कालकूटं प्रति केनचित् कविना। जगच्छ-

ब्देन स्वभिन्नसर्वप्राणिबोधनात् तत्समुदायानुगतस्यापराधस्य कस्यचिद्दुर्निरूपत्वाच्च खलानामेव सर्वसंहरणस्वभावता द्योत्यते । जिह्मवृत्तयः कपटव्यापाराः । जिह्मस्तु कुटिलेलस इत्यमरः । तादृशानर्थविधित्सवोऽपि वञ्चनार्थमस्मत्सन्निधिमवर्जयन्तः (?) इति यावत् । उक्तं हि—'आजन्मसिद्धं कौटिल्यं खलस्य च हलस्य च ।' इति । द्विजिह्वाः पिशुनाः; द्विजिह्वौ सर्पसूचकौ इत्यमरः । जिह्वाशब्दस्तन्मूलकवाक्यविशेषपरः । 'रामो द्विर्नाभिभाषते' इतिवत् द्विशब्दस्य परस्परविरुद्धार्थकवाक्यद्वयमर्थः । इदं च बहूनामप्युपलक्षणम् । अतः पुरुषभेदेन कलहार्थं विरुद्धोक्तीः प्रयुञ्जाना इति पर्यवसितार्थः । अत्र च द्विजिह्वशब्देन 'कस्तूरिकामृगाणाण्डाद्गन्धगुणमखिलमादाय । यदि पुनरहं विधिस्स्यां खलजिह्वायां निवेशयिष्यामीति' वक्तुः कवेः खलस्यैकजिह्वादर्शनेनैव महाभयोदये किमुत जिह्वाद्वयदर्शन इति भावस्सूचितः । अतश्च सर्वदा कलहप्रियत्वं फलितम् । तदाहु—'काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् । व्यसनेन तु मूर्खाणां निद्रया कलहेन च ॥' इति । अतस्तत्सान्निध्यं सुदूरपरिहार्यमित्याह दूरत इति । खलनिवासभूतदेशग्रामादिपरिहार एव प्रथमं श्रेयान् । असम्भवे तद्वीथिकागृहादिकं वा परिहरणीयमित्यर्थः । तदुक्तम्—'खलानां कण्टकानां च द्विविधैव प्रतिक्रिया । उपानहा मुखभङ्गः दूरतो वापि वर्जनम् ।' इति । तव्यप्रत्ययः प्रयत्नपूर्वककरणीयतां द्योतयति । यद्वा दूरत इत्यस्य परम्परयापीत्यर्थः । अतस्तत्सहचारिसहचारिपरम्परापि परित्याज्येति फलितम् । आहुश्च— दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि सन् । मणिना भूषितस्सर्पः किमसौ न भयङ्करः । इति ।

अतस्सर्पपरतयापि कश्चिदर्थः—

जगत्प्राणान् वायून् निगिरन्तः स्वाहारतया स्वीकुर्वन्तः, समीरमाहत-

# उद्यानपत्रिका ॥

"अन्या वाचो  विमुञ्चथ"

खेदापहारविकोशक्षेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २१] कलि { ५०४८ सर्वजित् ...मीन ... साधारण सं ७
{ ५०४९ सर्वधारि...मेष ... शास्त्रानुबन्धः सं ८

## गुणशिक्षा ॥

जगत इदानीन्तनी दुरवस्था न वाचा वक्तुं शक्या । तथा महती । अस्मिन् विषये सर्वे समानाभिप्रायाः । तस्याः परिहाराय किं कर्तव्यमित्यत्र तु महती विप्रतिपत्तिः । एकैकः एकैकधा मन्यते ।

अवश्यज्ञातव्येषु विषयेषु सर्वेषां जनानां परिपूर्णं विवेकं सम्पन्नं कृत्वा तत्तन्मर्यादायां स्थापनमेकं इदानीं अविलम्बेन क्रियमाणं सर्वक्षोभशान्तये शान्तिसमृद्धये परमसौख्याय च कल्पेतेति सुदृढोऽस्माकमभिप्रायः । यः कोऽपि सुधीः किमत्र विप्रतिपत्तुमर्हति ?

अथ जनेषु तादृशस्य विवेकस्य सम्पादनं कैः कर्तव्यम् ? केषां तत् प्राप्तम् ? केषामयं धर्मः ? विद्वांस इति वैदिका इति भागवता इति प्रथां वाञ्छतां बिभ्रतां च अस्माकमेवायं धर्मः अस्माभिरेवेदं कर्तव्यमित्यत्रापि, मन्ये, न कश्चिद् विप्रतिपत्स्यते । एवं सति वयमेव चेत् अतिपामरवत् अतिमूर्खवत् अप्रतिचिकित्स्यामतिपापां वृत्तिमाश्रित्य जगत्क्षोभमस्याभिवृद्धिमात्रं कुर्वन्तो भवेम किमस्मान् प्रति वक्तव्यम् । अनृतरुचिः वञ्चनोत्सवता परिवादरतिः इत्यादयो गुणविपर्यया यद्यस्मान् निवासगृहीकुर्वन्ति वयमेव विनष्टा भविष्यामः का वार्ता लोकपरित्राणस्य ।

अस्माभिः प्रकाश्यमाने कुवलयानन्दे विषमालङ्कारोदाहरणे 'भानु-र्निशासु' इत्यादिश्लोके व्याख्यानुरोधेन 'स हि मन्दतापः' इति पाठं निवेश्य "स हि मन्दतातः' इति रसवान् पाठः प्राज्ञैरादृतः ।" इत्यधस्तात् टिप्पण्यामवोचाम । इदं दृष्टवन्तः.... भूमिकाविशेषं परिगृह्य लिखन्ति—

'प्राज्ञैरादृत इति यदत्र लिखन्ति तत्र विचारः के ते प्राज्ञा इति । काञ्ची श्रीमत् .... स्वामिपादैरेव साधीयान् पाठोऽयमुल्लिखितो मदि-रेक्षणार्थतत्त्वप्रख्यापनपरप्रबन्धतल्लजेऽन्यत्र चेति सकलं जगज्जानाति । अद्यावधि नान्येन केनापि एतत्प्रस्तावोऽपि कृत इति च । एवं च.... स्वामिसूक्तिशरणा अमी पत्राधिपा इति सुव्यक्तं प्रामाणिकानां सुमन-सां सन्तोषास्पदं च ।

इति । एतत्पठनेन अस्माकं जाताश्चित्तवृत्तयः इमा इति इयत्य इति ईदृश्य इति न वक्तुं शक्याः ।

प्राज्ञैरादृत इति सबहुमानं निर्देशं कृतवन्तः स्मः । ते प्राज्ञा यदि स्वयमेव एते भवन्ति तर्हि तथा बहुमतिं प्रदर्शितवत्सु अस्मासु सुप्रीतैरे-भवितव्यम् । 'स्वामिसूक्तिशरणा अमी पत्राधिपाः' '.... स्वामिपादसूक्ति-मात्रजीवातव एते । नान्यवचोविश्वासिनः' इति खण्डपत्रिकाप्रकाशनेन उद्घुष्य विकत्थनस्य अस्मदयशःसम्पादनसम्भ्रमस्य वा का प्रसक्तिः, का औचिती ? को नाम ग्रन्थकारो लोके अस्ति यः प्रमाणतया वा संवादाय वा अन्यदीयग्रन्थात् किमपि नोदाहरति ? किं तावता कोऽपि परोपजीवनमात्र-पर इति स्वयं शुण्ठ इति सिद्ध्यति ? अहो बत एवमनवधिकाः शुष्का वाचो विसृजन्तः परानेवंविधान् असकृद्वदन्ति ।

'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इत्येतत्रैव ऐकान्तिकमिति इदानीं पश्यामः । किं प्रयोजनमुद्दिश्य एते सर्वदुर्गुणाकरपुरुषमात्रसुक-राणि अतिमात्रजुगुप्सनीयग्रन्थाभासलेखनानि कृत्वा प्रकाशयन्ति । स्वस्य परेषां वा स्वरूपस्वभावादिकं इदमीदृशमिति सर्वं जगज्जानातीति एते सम्य-

ज्जानन्ति । तेन लोकवञ्चनाया नास्ति मनागप्यवकाशः । अनार्जवकाष्ठायां स्थितानामेषां अदृष्टगतिरीदृशीत्यपि नूनं तेऽपि जानन्ति ।

अथेह तत्त्वस्थितिं ज्ञापयामः । उद्यानपत्रिकायाः प्रचरन्त्याः अद्य एकविंशं वर्षम् । प्रथमे वर्षे आनुपूर्व्या वयं कानिचित् पाठशोधनान्यकार्ष्म । अथास्मत्प्रियसुहृदः साङ्गवेदाध्यायिनः साहित्यवेदान्तनिष्णाताः आत्मगुणशेवधयः श्री वेलियनल्लूर् श्रीनिवासतातार्चायवर्याः कानिचित् पाठशोधनान्यकुर्वन् । तत्र अस्मदीयं सप्तमं शोधनम्— कुवलयानन्दे तुल्ययोगितोदाहरणे 'सञ्जातपत्रप्रकरान्वितानि' इत्यत्र अलङ्कारसर्वस्वानुरोधेन 'सज्जातपत्र.... ' इति भाव्यमिति । इदं प्रथमवर्षदशमसञ्चिकायां स्थितम् । अथ द्वादशसञ्चिकायां अस्मत्प्रियसुहृद्भिः कृतं, प्रकृते 'भानुर्निशासु' इति विषमालङ्कारोदाहरणश्लोके 'स हि मन्दतापः' इत्यत्र 'मन्दतातः' इति सहृदयसार्वभौमैराविद्यमानः पाठो युक्त इति शोधनं प्रकाशितम् ।

एवं सुचिरात् पूर्वमस्माभिः पत्रिकायां प्रकाशितं हृद्यं शोधनद्वयं स्वोपज्ञमिव परे मंदिरेक्षणार्थतत्त्वे महताऽऽडम्बरेण प्रकाश्य आहोपुरुषिकारसातिशयमन्वभवन् । तज्जानन्तोऽपि वयं प्रथमं

काव्यार्थचोराः प्रगुणीभवन्ति
कर्णामृतं रक्षत हे कवीन्द्राः ।

इत्येवंविधया रीत्या ईषद् विमनायिता अपि

गृह्णन्तु सर्वे यदि वा यथेच्छं
नास्ति क्षतिः कापि कवीश्वराणाम् ॥

इत्यनया रीत्या उदास्महि । सोऽस्माकं दोष इति इदानीं जानीमः । असज्जनापचारितोपेक्षणं नूनं सज्जनानामनुतापाय भवति । परेषां चौर्यशीलत्वं तदानीमेवोद्घाटनीयमनुद्घाटितवन्तो वयं ध्रुवमसह्यापराधाः ।

पण्डितपदकांक्षिषु सर्वज्ञमानिषु भागवतवेषधारिषु एषु एवं निर्लज्जं

निर्भयं परमकुटिलां वृत्तिमाश्रयन्तु पामरव्यपदेश्यानामन्येषां जनानां वृत्तिः या काचिदपि भवन्ती कथं कस्यचिद्विस्मयाय भवेत् । इदं तु पूर्वोक्तं पुनः स्मारयामः—

> परीवादः शक्त्या भवतु परिहासः प्रसरतु
> क्रुधोद्दण्डं भर्त्स्येमहि कथमपि क्षुब्धमनसः ।
> भविष्यामो नाम्री वयमथ तु निघ्नामृजुपदे
> भजन्तः स्थास्यामोऽनृजुदमनधाटीधूर्तधियः ॥

---

# समासे भवतीशब्दः ॥

(V. R. Srinivasa Tatacharya Siromani)

वेणीसंहारपञ्चमाङ्कनवमश्लोके 'एषोऽहं भवतीसुतक्षयकर' इति प्रयोगोऽस्ति । अत्र व्याख्याता जगद्धरः भवतीशब्दे पुंवद्भावमाशङ्क्यैवं समाधत्त— 'भवतीत्यत्र पुंवद्भावाभावः प्रियादिपाठात् स्त्रियाः पुंवदिति योगविभागाद्वा' इति । समाधानमेतन्न हृद्यम् । तथा हि— कौमुद्यां बहुव्रीहिप्रकरणे 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरणीप्रियादिषु' इति सूत्रस्य 'भाषितपुंस्कादनूङ् ऊङोऽभावो यस्यामिति बहुव्रीहिः निपातनात् पञ्चम्या अलुक् षष्ठ्याश्च लुक् तुल्ये प्रवृत्तिनिमित्ते यदुक्तपुंस्कं तस्मात्पर ऊङोऽभावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं स्यात् समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे न तु पूरण्यां प्रियादौ च परतः ... ... चित्रगुः रूपवद्भार्यः' इति व्याख्यानं दृश्यते । भवतीसुतक्षयकर इत्यस्य भवत्याः सुताः भवतीसुताः तेषां क्षयः तस्य कर इति विग्रहः कार्यः । सुतशब्दस्य भवतीशब्दसमानाधिकरणस्त्रीलिङ्गोत्तरपदरूपत्वाभावात्तस्मिन्परे भवतीशब्दे चित्रगुरित्यादिषु चित्रादिपदेष्विव पुंवत्त्वप्राप्तिरेव नास्ति । अतः तत्प्रतिषेधार्थमनाकृतिगणप्रियादौ सुतशब्दपाठकल्पनं न युज्यते । अपि च तत्र तत्पाठकल्पनेऽपि सर्वप्रिय इत्यादिवत् सर्वनाम्नो वृत्तिमात्र इति पुंवत्त्वं वारयितुं न शक्यते । स्त्रियाः पुंवदिति योगविभागो भाष्यादिषु न लक्ष्यते । किञ्च नञुपहितेन तेन पुंव-

द्भाव एव साधयितुं शक्यते। नन्वभिमतस्तद्भावः। अथोच्येत—'योगविभागादिष्टसिद्धिः' इति परिभाषया प्रकृते पुंवद्भावस्याप्यप्रवृत्तिरिति। एतदपि न हृदयङ्गमं सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति भाष्यकारेष्ट्या पुंवद्भावस्य दुर्वारत्वात्। किञ्च स्त्रियाः पुंवदित्यस्य विभक्तोत्तरयोगेनागतार्थत्वसिद्धये समानाधिकरणभिन्नस्थले प्रत्ययेऽप्रत्यये वा परे स्त्रीवाचकशब्दस्य पुंवद्भाव इत्यर्थो व्याप्तिन्यायेनाश्रयणीयो भवेत्। तथा सति तत्र प्रत्ययेऽप्रत्यये वा परे पूर्वस्य स्त्रीवाचकशब्दस्य पुंवद्भावं विदधतां बहूनां वचनानां वैयर्थ्यं प्रसजेत्। अतः स्त्रियाः पुंवदिति योगविभागाश्रयणमपि न साधु भाति। श्रीस्तुतौ

'यत्सङ्कल्पाद्भवति कमले यत्र देहिन्यमीषां
जन्मस्थेमप्रळयरचना जङ्गमाजङ्गमानाम्।
तत्कल्याणं किमपि यमिनामेकलक्ष्यं समाधौ
पूर्णं तेजस्स्फुरति भवतीपादलाक्षारसाङ्कम्॥'

इति श्लोकोऽस्ति। तद्व्याख्याने 'भवतीपादलाक्षारसाङ्कम्' इत्यत्र भवतीशब्दस्य सर्वनामत्वेन सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भाव इति भवत्पादलाक्षेति स्यादिति चोदयन्ति। 'एकोऽहं भवतीसुतक्षयकरः' इति वेणीसंहारे 'भवतीसहायरहस्या हरिम्' इति श्रीगुणरत्नकोशे अत्र च बहुशः प्रयोगदर्शनेन भवच्छब्दसर्वनाम्नः शतृप्रत्ययान्तभिन्नस्य संभावितत्वादन्यथागत्यन्तराभावादिति परिहरन्ति' इत्यभ्यधीयत। 'अत्रत्यपरिहरणं न चोद्यानुगुणम्। भवतीपादलाक्षेत्यत्र सर्वनाम्नो वृत्तिमात्रे' इत्यस्य प्रवृत्त्या भवत्पादलाक्षेति स्यादिति चोद्यम्। तदप्रवृत्त्या भवत्पादलाक्षेति न स्यादित्येव तदनुरूपमुत्तरं न तु भवच्छब्दसर्वनाम्नः शतृप्रत्ययान्तभिन्नस्य सम्भावितत्वादित्यादिप्रतिपादनम्। श्रीरङ्गनाथपादुकासहस्रे

द्वितयं प्रतियन्ति रङ्गभर्तुः कतिचित्काञ्चनपादुके शरण्यम्।
अभयान्वितमग्रिमं करं वा भवतीशेखरितं पदाम्बुजं वा॥

इति नवपञ्चाशत्तमपद्यव्याख्याने 'भवतीशेखरितं ... सर्वनाम्नो वृत्तिमात्रे पुंवत् इत्येतत् भवतीशब्दविषये प्रायिकं 'ठक्छसोश्च' इति भवतीशब्दस्य पुंवद्भावविधायकात् वार्तिकात् ज्ञापकात् अतो भवच्छेखरितमिति नाशङ्कनीयम्' इति व्याख्यायत। कौमुद्यां बहुव्रीहिप्रकरणे 'ठक्छसोश्च' भवत्याः छात्राः भावत्काः भवदीयाः। एतद्वार्तिकं 'एकतद्धिते च' इति

सूत्रं च न कर्तव्यं 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव' इति भाष्यकारेष्ट्या गतार्थत्वात्' इत्यगद्यत । लघुशब्देन्दुशेखरे गतार्थत्वात् इति प्रतीकमुपादाय 'न चैकशब्दादकचि त्वादौ एकिकत्वमित्यादौ पुंवत्त्वे इकारो न श्रूयेत पाचकजातीयेतिवत् ह्रस्वे तु ग्रामजीविकवत् तच्छ्रवणमित्येकतद्धिते चेति न गतार्थ एकेत्यविभक्तिको निर्देशो न लोपःप्रातिपदिकान्तस्येतिवन्न स्वरूपविवक्षार्थ इति वाच्यम् । तादृशप्रयोगाणामनभिधानमित्यभिमानात्' इत्याख्यायत । अत्र अभिमानादिति व्याहारेण एकिकत्वमित्यादिप्रयोगसिद्धये एकतद्धिते चेति सूत्रस्यावश्यकत्वात् कौमुद्युक्तं भाष्यकारेष्ट्या तत्सूत्रस्य गतार्थत्वमयुक्तमिति शेखरकाराशयः प्रतीयते । पादुकासहस्रव्याख्याने पूर्वोक्तवार्तिकस्य इष्टिप्रायिकत्वज्ञापकत्वोक्त्या, तज्ज्ञापनार्थमावश्यकस्य वार्तिकस्य कौमुद्युक्तं गतार्थत्वमनुचितमिति पादुकासहस्रव्याख्याकाराभिप्रायोऽवगम्यते । अयमेवाभिप्रायो दुर्घटवृत्तौ षष्ठाध्याये तृतीयपादे स्त्रियाः पुंवदित्यादिसूत्रे 'कथम् 'एकोऽहं भवतीसुतक्षयकरो मातः कियन्तोऽरय' इति वेणी, भवतीप्रसादादिति चण्डी, सर्वनाम्नो वृत्तिमात्रे पुंवदिति वचनात् । उच्यते — पुंवदिति योगविभागसाध्यमिदं क्वचिदेव । अत एव वृत्तौ न लिखितम्' इति स्त्रियाः पुंवदिति योगविभागमभ्युपगम्य वदतश्शरणदेवस्य, दक्षिणा पश्चात्पुरसस्त्यक् इति सूत्रे 'केचित्तु ठकछसोश्चेति वार्तिकारम्भेण भाष्यकृता सर्वनाम्न इतीष्ट्या तत्प्रत्याख्यानेन चेष्टेरनित्यत्वादित्यादिकमाचक्षाणस्य शेखरकारस्य चास्तीत्यवसीयते । कौमुद्युक्तरीत्या सूत्रवार्तिकयोर्गतार्थत्वाङ्गीकारे एकिकत्वमित्यादीनां, 'भवतीसुतक्षयकरः', भवतीपादलाक्षारसाङ्कम्' इत्यादीनां च शिष्टप्रयोगाणामसिद्धिः स्यात् । शिष्टप्रयोगसंग्रहे तु सर्वनाम्न इतीष्टेः भवच्छब्दाविषयकत्वमुपपाद्य भवतीभागधेयेन, भवत्यधीनैः, इत्यादिप्रयोगा असाध्यन्त । लिङ्गसामान्ये नपुंसकत्वमाश्रित्य 'सततं भावो भवत्कुन्तळे' इति प्रयोगस्समाध्येत च । वृत्तौ भवतीशब्दस्योपसर्जनत्वेनासर्वनामत्वेऽपि 'इष्टौमात्रग्रहणाद्यस्य क्वचित्सर्वनामत्वं दृष्टं तस्य वृत्तौ पुंवत्त्वमित्यर्थः' इति शेखरे इष्ट्यर्थवर्णनेनात्र वृत्त्यनन्तर्भावे भवच्छब्दे स्थितं सर्वनामत्वं वृत्त्यन्तर्भावे ङीप्प्रकृतौ तस्मिन् भूतपूर्वगत्या स्वीकृत्य लिङ्गविशिष्टपरिभाषया भवतीशब्दस्य सर्वनाम्नो वृत्तिमात्र इत्यत्रत्यसर्वनामपदेन ग्रहणमनुसन्धाय च पुंवत्त्वाशङ्का कृतेति विभावनीयम् ।

शेक्स्पिअर्-कृतं

# यथाभिमतम्॥

लेबो—साधो आर्य, मित्रभावेन त्वां ब्रवीमि—त्यजेदं स्थानम् । यद्यपि त्वं श्लाघामर्हसि प्रीतिं च, तथाऽपि राजा सम्प्रति तथाविधायां स्थितौ वर्तते यथा त्वत्कृतं सर्वं अन्यथा गृह्णाति । चलचित्तः सः । यथा स वर्तते तस्य मया कण्ठतोऽभिधानात् भवता उत्प्रेक्षणं युक्तम् ।

आर्लेन्डो—नमस्ते । अथ प्रार्थये कथय मे द्वयोः कतरा अत्र मल्लयुद्धं द्रष्टुमागता राज्ञः पुत्री ?

लेबो— गुणतो निर्णये नैकाऽपि तस्य पुत्री । अथापि तु ह्रस्वा तस्य पुत्री । अपरा निष्कासितस्य राज्ञस्तनया आक्रामता पितृव्येन इह अवस्थापिता स्वतनयायाः साहचर्याय । अनयोरुभयोः सौहार्दं सोदर्योः प्रीतिबन्धमतिशेते । इदन्तु वक्तव्यम्— अचिरात् सः गुणवत्यामस्यां द्वेषं करोति । न च तत्र अन्यत् कारणं विना इदं यत् सा गुणवत्तया जनैः श्लाघ्यते ; सन्तं पितरमुद्दिश्य अनुकम्प्यते च । प्राणैः शपे स तस्यै अप्रतीक्षितं झटिति द्रोहमाचरिष्यति । आर्य, सुखी भव । इतः परं, अद्यतनात् शोभने लोके, त्वद्योग्यतायाः परिज्ञानं त्वयि प्रीतिश्च भवत्विति आशंसे ।

आर्लेन्डो—सर्वथा त्वयि कृतज्ञो वर्तिष्ये । सुखी भव ।

[निष्क्रान्तो लेबो]

इत्थं मया धूमात् धूम्या गन्तव्या । क्रूराद्राज्ञः क्रूरो भ्राता । अहो दिव्या रोसलिन्द !

तृतीयं प्रेक्षणकम् : प्रासादे अन्तर्गृहम्।

सिलिआ रोसलिन्द् च प्रविशतः ।

सिलिआ—किं, पितृव्यपुत्रि । किं, रोसलिन्द् । कामदेवो दयताम् । नैकं वचः ?१

रोसलिन्द्—नैकं शुनि क्षेप्तुम्२ ।

सिलिआ—न । तव वचांसि तथा अभ्यर्हितानि यथा न सारमेयेषु क्षेपमर्हन्ति३ । तेषु कानिचिन्मयि क्षिप । एहि खञ्जय मां हेतुभिः४ ।

रोसलिन्द्—तर्हि द्वे पितृव्यपुत्र्यौ अवस्थे भवतः । यत्र एका हेतुभिः खञ्जीकृता ; अन्या हेतुं विना मत्ता ।

सिलिआ—अथ सर्वमिदं किं तव पितुः कृते५ ?

रोसलिन्द्—न । अंशतः मदपत्यस्य पितुः कृते ।६ अहो कण्टकमञ्जरीभिः कियत्पूर्णमिदं व्यापृतिमयं जगत्७ ।

---

१ किमपि न भाषसे । तथा तीव्रा ते कामबाधा । इयती पीडा यथा न स्यात् तथा कामं प्रार्थय इति हार्दम् ।

२ शुनोऽधिक्षेपपरं, तथाऽल्पमपि, वचनं, न मे सम्प्रति वक्तव्यमस्तीति तात्पर्यम् ।

३ सिलिआ तु यथाश्रुतार्थं गृहीत्वा तं प्रतिषेधन्ती आह ।

४ "मौनं परित्यज्य सम्भाषस्व । नात्यन्तं विषण्णा भव । अस्ति अतिविषादस्य कारणमिति चेत् नास्तीति वादिनीं मां युक्तिभिः पराजयस्व" इति भावः ।

५ मदनपीडिता रोसलिन्द् इति जानत्यपि सिलिआ साक्षात् तत्प्रश्नकरणे औचित्यमान्द्यं पर्यालोच्य एवं पृच्छतीति विभाव्यम् ।

६ रोसलिन्द् पुनः, 'अस्त्येव पितृशोकः । अन्यो मन्मथक्लेशोऽपि साम्प्रतमुत्पन्नः' इति स्पष्टमाह ।

७ कथं मन्मथगोचरे पतितासीति शङ्कायां नाहं तस्मिन् पतिता । स मां बलादाक्रन्दतीति समाधानमभिप्रेत्याह—अहो कण्टकेति ।

सिलिआ—खस:, उत्सवकालिकजाड्येन तवोपरि क्षिताः पांसव इमे१ । यदि वयं क्षुण्णे पथि न सञ्चरेम तर्हि साक्षात् अस्मत्कञ्चुलिका अपि तान् गृह्णीयुः२ ।

रोसलिन्द्—मम कञ्चुकात् तानहं धूनयेयम् । इमे पांसवः मम हृदि लग्नाः ।

सिलिआ—हेम् कुरु (कासस्व३) तान् बहिः ।

रोसलिन्द्—यतेय यदि 'हेम्'-कर्तुं४ तं५ लब्धुं च शक्नुयाम्६ ।

सिलिआ—एह्येहि । चित्तवृत्तिभिर्मल्लयुद्धं कुरुष्व७ ।

रोसलिन्द्—हा, ताः मत्तः बलवत्तराणां मल्लानां रूपं बिभ्रति ।

सिलिआ—शोभनां काञ्चिदाशंसां त्वां प्रति करोमि ; यतस्व काले, सत्यपि निपाते । अथ तु परिहासं परित्यज्य तत्त्वं भाषेमहि । किमिदं शक्यं यत् त्वं झटिति आर्य-रोलन्द्-अस्य कनिष्ठे पुत्रे तथा गाढानुरागा संवृत्ताऽसि ?

रोसलिन्द्—मम पिता प्रभुः तस्मिन् उद्रिक्तस्नेह आसीत् ।

---

१ विवाहेषु यत् परिहासशीलाः चूर्णप्रक्षेपं कुर्वन्ति तदिह स्मर्तव्यम् ।

२ मनसो धृतिं विहाय कुलशीलादिभिस्तुल्य एव भर्ता वरणीयः । नियमातिक्रमेण दृष्टमात्रे यस्मिन् कस्मिंश्चिदनुरागं यदि कुर्याम तर्हि वाच्या भवेमेत्यभिप्रायः ।

३ कासनेन बहिर्नुदेत्यर्थः ।

४ हेम् हम् इत्यनुकरणशब्दः । अनुभूतस्य क्लेशस्य अपगमे सति 'हम्मा' 'अम्मा' इति शब्दोच्चारणं क्रियते । स इहाभिप्रेत इति भाति ।

५ तं आर्लन्दो-इमम् ।

६ साफल्यप्रतिभासे यत्नः कर्तुं शक्य इति भावः ।

७ यतस्व । साफल्यं भविष्यत्येवेति हृदयम् ।

सिलिआ— तेन किमिदमनुपतति यत् त्वया तस्य पुत्रे गाढानुरागया भाव्यमिति ? इमां सरणिमनुसरन्त्या मया तस्मिन् द्वेषः कार्यः, यतो मम पिता तस्य पितरं बहु द्वेष्टि स्म । न च तस्मिन् मे द्वेषः ।

रोसलिन्द्— मा, पुण्यमस्तु, मा तं द्विक्षः मम कृते ।

सिलिआ— कुतो न द्विष्याम् ? किं न स निकाममर्हति[1] ?

रोसलिन्द्— अहं तदर्थं[2] तस्मिन् अनुरक्ता भवानि । अहमनुरक्ताऽस्मीत्यनेन कारणेन त्वं तस्मिन् स्निह्य । पश्य, इत आगच्छति राजा ।

सिलिआ— क्रोधपूर्णाभ्यां लोचनाभ्याम् ।

---

१ पितृवैरानुसारेण पुत्रद्विष्टया भाव्यमिति स्थिते मम द्वेषं आर्लन्दो अर्हत्येवेति भावः ।

२ मम पितुर्यः सखा तस्य पुत्र इत्येतदर्थमित्यर्थः ।

# गैर्वाण्यां गद्यकाव्यम् ॥

(U. Venkatakrishna Rao, Lecturer in Sanskrit, Christian College, Madras.)

अशृङ्खलितं पद्यं इति कश्चन पाश्चात्यः डाण्टे-नामकः कविः गद्यकाव्यं निर्दिष्टवान् । भारतवर्षेऽपि, इदमेव लक्षणं भंग्यंतरेणासूचयत् श्लोकं पादबद्धं लक्षयन् भगवान् वाल्मीकिः । काव्यादर्शकर्ता दण्डी च इममेवाभिप्रायमाविष्कुर्वन् अपादः पदसन्तानो गद्यमिति निर्दिशति । परन्तु शोचनीयमेतद्यत् यदस्याशृङ्खलितत्वं गद्यकाव्यस्य सर्वात्मना अनियन्त्रितायाः प्रौढि नाश्रेयसरं भवति, प्रत्युत क्लिष्टपदभूयिष्ठं दुर्वहं पर्यवस्यति । 'उत्सवः सुधियामेव हन्त दुर्मेधसो हताः' इति भामहोक्तं अत्रैवान्वयं लभते । आधुनिकभाषासूपलभ्यमाना नावलाख्या 'कादम्बरी' गैर्वाण्यां नैव दृश्यते । नापि तादृशं सरलं गद्यं, यादृशं अधुना वार्तापत्रिकासु लभ्येत ।

अत्र कारणानि बहूनि स्युः । कदाचित् अस्मत्पूर्वजानामित्थमाशयः स्यात् । एतादृश्यः 'कादम्बर्यः' वार्तापत्रिका वा अस्मान् पारमार्थिकतत्त्वादन्यत आकृष्य विषयासक्तान् कुर्युः । काव्यविमर्शकोऽपि बुद्धिपूर्वकं अन्यथा वा काव्यज्ञशिक्षाभ्यासक्रमं बोधयन् अत्र परीक्षणाप्यपराधी स्यादेव ।

गैर्वाण्यां गद्यं यजुर्वेदे ऋत्विजां याज्ञिकान्नियोगान् ददत् प्रथमं प्रादुर्बभूव । काले गते बहुतिथे ब्राह्मणेषु दीर्घदीर्घाणि नीरसानि व्याख्यानानि पठत्सु विरक्तिं जनयामासुः । गूढार्थभूयिष्ठं संक्षिप्ततमं सूत्रात्मकं गद्यं तदनन्तरमाविर्बभूव । अर्थस्यानियतत्वं सर्वथा दूरे अपास्तमासीत् । अर्धमात्रालाघवं पुत्रोत्सवं मन्यमानाः पाणिनीयाः अत्र मार्गदर्शिनः अभवन् । इत्थं च क्रमेण पर्यवस्यति—पञ्चाळिकाप्रायं सूत्रं महत् व्याख्यानमपेक्षते खलु । एते भाष्यग्रन्थाः वादात्मिकया शैल्या उपनिबद्धाः, प्राकृतानां जनानां भयावहा अभवन् । अपरिवर्तनीया भाषा क्रमेण वैयाकरणानामनुग्रहेण बभूव । प्रभुसंमितया वाचा भगवान् पतञ्जलिः जगर्ज—'अपाणिनीयं तु भवति' इति । एतया बिभीषिकया संत्रस्ता गद्यकाव्यनिर्माणात् सर्वथा विरेमुः ।

'तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन' इत्युद्घोषयन् काव्यतत्त्ववेदी दण्डी काव्यालापनिर्माणात् भाविनः कवीन् भीषयति । अत्रेदं बोध्यम्—गद्यं पद्यमुभयमपि अस्माकं दृष्ट्या काव्यव्यपदेशभाक् । आङ्ग्ल्यादिभाषासु पद्यमेव काव्यत्वेनाद्रियते । एतस्य नियमस्य उल्लेखनात्पूर्वं प्राकृता जना अपि गद्यकाव्यनिर्माणे बद्धादरा एवासन् इत्यभ्यूहयितुं शक्नुमः । कश्चन प्राजिता स्वीयप्रभुणा सह आत्मनामनिर्वचनं कर्तुमपि प्रभवति पातञ्जले महाभाष्ये । तत्रैव पस्पशाह्निके यर्वाणस्तर्वाण इति हास्यास्पदमुपाधिं प्रापिताः केचन ऋषय इत्यप्युल्लिख्यते । परं तु एते याज्ञे कर्मणि शुद्धां संस्कृतामेव वाचं प्रयोजितवन्तः । ईदृशी अनियन्त्रणा कालक्रमेण भगवतः पतञ्जलेः प्रभुसंमितात् शासनादनन्तरं निःशेषं ननाश । सर्वत्रापि पाणिनीया अपरिवर्तनीया भाषा एव प्रयोक्तव्याधुना । इत्थं कवेः

ऽभवत् । इत्थं च वैद्यकीयज्योतिषसङ्गीतपौरोहित्यादिषु लाभदायकेषु शास्त्रेषु समयोचितविषयाणां शीघ्रं उपस्थानाय गद्यं सर्वथानुपयुक्तं मत्वा पद्यमेवाश्रयणीयमकरोत् । अमरकोशादयोऽपि कण्ठस्थकरणसौकर्याय छन्दोनिबद्धा बभूवुः । शिलाशासनादिष्वपि काव्यनिर्माणकौशलं प्रकटीकर्तुमिच्छन्तः पद्यसरणीमेव श्लाघ्याममन्यन्त अस्मत्पूर्वजाः ।

आध्यात्मिकेष्वपि विवादेषु विविधवादसरणीनां महार्थं संग्रहश्लोकाः सर्वत्र नियमेन दृश्यन्ते । कीट्स्नामकः प्रसिद्धः आङ्ग्लकविस्तु इत्थं समाम्नासीत्—नीरसस्याध्यात्मिकदर्शनस्योपसर्पणे सर्वा काव्यनिर्मातृकप्रतिभा उड्डीना भवति, अर्थात् अध्यात्मवादः दिव्यां काव्यशक्तिं संकुचितां करोतीति । परन्तु अस्मद्देशे अध्यात्मवादः धर्मश्च साहित्यशास्त्रस्य विविधेष्वपि भागेषु स्वीयं सर्वङ्कषं प्रभावं साकल्येन प्रकटयामासतुः । अनेन कवीनां दृष्टिः शक्तिर्वा संकुचिता न्यूनीकृता एकमार्गपरिमिता च बभूव । नाटकेषु महाकाव्येषु वा विषादान्तत्वं कालक्रमेण प्रतिषिद्धमभवत् । वस्तुतत्त्वे विचार्यमाणे तु अस्माकं काव्यानामादर्शभूते द्वे अपि रामायणमहाभारते विषादान्ते एवास्ताम् । रामायणस्य सीतात्यन्तवियोगपर्यन्तत्वं आनन्दवर्धनाचार्यैर्ध्वन्यालोके चतुर्थोद्योते उररीकृतम् । महाभारतस्य विषये तु न कस्यचन विमतिरस्मिन्विषये । काव्यनिर्माणशक्तिसङ्कोचनं कुत्र इति चेत् शास्त्रीयादिनीरसविषयेऽपि काव्यरचनं निर्दिशामः । अत्र विमृश्यमाने कण्ठस्थकरणसौकर्यमेव हेतुः इति अन्ततः पर्यवस्यति ।

उत्कण्ठविरचितपदासु गीतिषु—'लिरिक्स्' इति आङ्ग्लयां व्यपदिश्यमानासु —एवं प्रायः आध्यात्मिकतत्त्वानां सङ्कलीकरणं साहित्यनिर्माणे आरोग्यावहमासीत् । यतः एतादृश्यः भावगीतयः अधिकतरं भावपूर्णा बभूवुः । प्रेमभक्तिरसयोः सङ्कलनेन अन्यादृश्यः गीतयः गोपिकागीतगीतगोविन्दसदृश्यः (—यादृश्यः अन्यभाषासाहित्ये नैव दृश्यन्ते लोके—) प्रादुर्बभूवुः कविवरेण्यानां प्रतिभासु । प्रस्तुतगद्यकाव्यविषयपर्यालोचने

तु पद्यनाटकगीतानां निर्माणमेव कविप्रतिभायाः अतीवानन्ददायि आसीत्। गद्यनिर्माणवार्तापि दूरे अपास्ता। क्रमेण च गद्यं दाक्षिण्येन नाटकेषु चम्पूषु वा अङ्गत्वेनादृतमभवत्। अत्रापि च कादम्बर्युपज्ञं मार्गमनुसृत्य समासभूयिष्ठां श्लेषप्रायामोजोनिबद्धामेव शैलीमादृत्य सामान्यजनावर्जनाय न कदाचिदप्ययतन्त।

उक्तमेव प्राक् यत् गद्यपद्ययोः अविशेषेण काव्यव्यपदेशः भारतवर्षे। इत्थं च विषयविवेचनं विनैव अन्वयव्यतिरेकाभ्यां सामान्यतः गद्यप्रतिपाद्याः विषयाः पद्ये, वैपरीत्येन पद्यप्रतिपाद्याः विषयाः गद्ये, निर्विशङ्कं प्रत्यपाद्यन्त। अत्रापि इदमवधेयमिति भाति यत् गद्यग्रन्थानां लेखनं विना संरक्षणं दुस्साध्यमासीत्। पद्यग्रन्थानां तु कण्ठपाठसौलभ्येन लेखनमन्तरैव सङ्गोपनं न दुःखावहमासीत्। वैदिकग्रन्थेषु च पुस्तकलेखनं अपवित्रकरणात् मुक्तकण्ठं निषिध्यते। बहोः कालादनन्तरमेव अर्वाचीनतमे हरिवंशे पुराणेषु च पुस्तकदानस्य प्राशस्त्यमादृतमभूत्। देवनागरी लिपिरपि लेखनाय कष्टसाध्या। अतः सर्वत्रापि देशीयभाषास्वेव लेखनप्रथा सर्वसंमता अभवत्। इत्थं च व्यवहारोपनता भाषा लिखितपुस्तकस्थभाषायाः दूरदूरं गमिता। एष भेदः गद्यकाव्यस्यावनतेः मुख्यतमं कारणमभवत्। भरतादयः नाट्यशास्त्रप्रणेतारश्च कृतविद्यानां ब्राह्मणादीनां संस्कृते व्यवहारं प्रकल्पयन्ति। अकृतविद्यानां स्त्रीणां च प्राकृतादिभाषास्वेव व्यवहारमाज्ञापयन्ति। इत्थं च व्यवहृतं वचः लिखितात् सर्वथा अन्यादृशमेवाभवत्।

इत्थं च संस्कृतगद्यकाव्यस्य चरितं दुःखावहं भवति। गद्यप्रणेतारः पश्चषाः बाणदण्डिसुबन्धुप्रमुखा एव। सरलं च गद्यं अतिप्रयत्नेन नाटकेषु, हितोपदेशे पञ्चतन्त्रे भगवतः पतञ्जलेः महाभाष्ये, शङ्करभगवत्पादानां ब्रह्मसूत्रभाष्ये वा कदाचिदुपलभ्येत। अत्र च कारणं सुगममेव। एते महात्मनः सामान्यजनानुद्दिश्य ग्रन्थरचनां चक्रुः। तथा च गुरुशिष्यसम्वादरूपां शैलीमुररीकृत्य तेषामभिप्रायान् जनविदितान् जनप्रियांश्च चक्रुः।

इयं च शैली अन्यासु भाषासु उपलभ्यमानया गद्यशैलया सर्वथा साम्यं भजेत्, पदानां सुविहिता स्थितिः ( words in their best order ) इत्यपि लक्षयितुं शक्यते । पद्यं च इत्थमेव— अनुत्तमानां पदानां सुविहिता स्थितिः (best words in their best order) इति कदाचिल्लक्ष्यते ।

---

# भङ्गलक्षणम् ॥

(T. Venkatacharya B. O. L.)

मन्दिरेक्षणार्थतत्त्वाख्यायां कृतौ—

"अधुनापि न भङ्गलक्षणं सलिलोन्मज्जनमुज्झति स्फुटम् ।"

इति नैषधीयं पद्यभागमुपादाय मल्लिनाथेनापि व्याख्याता भङ्गपदस्य कोशप्रसिद्धः ऊर्मिरूपार्थः तत्र विस्मृत इति उक्तम् । इयं च तत्रत्या पङ्क्तिरचना—

**'वस्तुतस्तु भङ्गपदं श्लिष्टम् । अन्यथा स्वारस्यमेव नास्तीति साहित्ये निष्णाताः जानन्ति । अयं च विषयः अस्माभिरन्यत्र सुविपुलं उपपादि इति नात्र विस्तरः । मेधावी मल्लिनाथोऽप्यत्र श्लेषं न प्रतिपेदे, कोशविस्मरणादेव । क्वाचित्कबोधः क्वचिद्विस्मरणं इत्यादिकं जनिधर्मणां न खल्वसम्भावितम्'**

इह हि सुषमाविषये दिव्येन जलेन परीक्षणं इति, भङ्गलक्षणं नाम पराजयचिह्नं इति च व्याख्यातारः विवृण्वन्ति । भङ्गपदस्य ऊर्मिरूपार्थः कोशे उक्तोऽस्तु कामम् । किं तेनैव हेतुना स सर्वत्र वक्तव्यः ? सम्भवस्थले हि तथा । भङ्गपदस्य पराजयार्थः प्रकृतेसम्भवति इति व्याख्यातृभिः तथा व्याख्यायि । नैकोऽपि व्याख्याता भङ्गपदस्य ऊर्मिरूपार्थं प्रकृते उपादत्ते । असम्भव एव निदानं स्यात् अविशेषेण सर्वे व्याख्यातृभिः तदर्थपरित्यागे । यदि च ऊर्मिरूपार्थः इह घटेत तर्हि तदुपपादनं कार्यम् । 'पल्लवराग-

ताम्रा' 'सञ्जातपत्रप्रकरान्वितानि' इत्यादीनां परिहरपादितपूर्वमर्थं पाठादिकं च विवृत्य मङ्गलक्षणे परं 'अन्यत्र उपपादि' इति गम्भीरं अपसरन्ति। शक्यत्वे इह सोऽर्थः प्रतिपादयितुमुचितः इति नूनं क्षेमेन्द्रो ब्रूयात्। अपसरणं हि प्रतारणपर्याय एव स्यात्। अन्यत्रेति किं विवक्षितं इति तत्त्वं देव एव वेद। अथवा मङ्गलक्षणमिदम्। पर्यालोच्यमाने कोशार्थेन श्लेषस्य नात्र संभव इति मनीषिणो मन्यन्ते। ऊर्म्यर्थकत्वे मङ्गलक्षणपदस्य कोऽर्थः? स चेद्वस्तुतः सम्भवति तर्हि सुधीरमुपपाद्यताम्। नेदं प्रतारणं इति च सहृदया वदन्तु।

---

# पुस्तकपरामर्शः ॥

वासिष्ठवैभवम्। काव्यकण्ठ-वासिष्ठ-गणपतिमुनिचरितम्। तदन्तेवासि श्रीकपालिशास्त्रिप्रणीतम्। श्रीनन्दिनीमुद्रणालयः Sirsi, North Kanara अत्र मुद्रितम्। रूप्यद्वयमूल्यम्।

चम्पुरूपेण लिखितं काव्यमिदं प्रकरणात्मना विभक्तम्। विषयभूतो महान् अस्माकं बहुधा कर्णगोचरं गत एव। अद्भुता काचिदस्य शक्तिरासीदिति प्रायः सर्वे वदन्त आसन्। जन्मतः प्रभृति आन्तं तदीयं चरितमिह निबद्धम्। वैदिकादिप्रभृति साहित्यपर्यन्ते संस्कृतग्रन्थजाते समस्ते गाढपरिचयोऽभिज्ञः कविपरिबृढः श्री कपालिशास्त्री अतिसरलं अतिचतुरं अतिमनोहरं च कथां कथयति। अर्वाचीनचरितमेवं रमणीयं लिखन्तः कवयो विरलाः। काव्यरसिकाः अवश्यमिदं द्रष्टुमर्हन्ति।

मुद्रणं रमणीयम्। अशुद्धयस्तु काश्चित् सन्ति। पुनर्मुद्रणे ता नूनं शोध्येरन्।

---

निपीय तोयं तटिनीतटाकान्  
शुष्कानशेषानकरोः खरांशो।  
वयं पिपासाकुलिता बत स्मो  
न किञ्चिदप्यम्बु विमुञ्चसि त्वम् ॥

Registered No. M 2300.

Book XXI ॥ श्रीः ॥ Nos. 9, 10, 11 & 12

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. २१] कलि ५०४९ सर्वधारि | वृषभ कर्कट } साधारण सं ५, ६ | मिथुन सिंह } शास्त्रानुबन्ध-सं ,, आहत्य ,, १२

# THE UDYANA PATRIKA.

A
SANSKRIT MONTHLY

May, June, July & August 1948

## विषयाः ॥

शास्त्रानुबन्धः—

कुवलयानन्दः । [बुधरञ्जनीसमेतः] २४५—२५२

1 मेनका ।
2 सुभाषितनीवी ।
3 संस्कृतम् ।
4 केचन विशेषाः ।
5. यथाभिमतम [नाटकम्]
6 पूर्णत्वसंवादः ।
7 नाटककथासारः ।
8 विद्वत्सु विज्ञापनम् ।
9 विद्वान् महाराजः ।
10 पुस्तकपरामर्शः ।
11 नारायणः ।
12 प्रतिबोधनम् wrapper

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription Re. One only.
Do. With Sanskrit Supplement Rs. 2—0—0

उद्यानपत्रिका ॥

१. अस्या वार्षिकं मूल्यमेकं रूप्यम् । सानुबन्धाया द्वे रूप्ये ।

२. कन्यामासे साधारणसञ्चिका अनन्तरमासे शास्त्रानुबन्ध इत्येवं क्रमेण षट्सु मासेषु साधारणसञ्चिकाः षट्सु मासेषु अनुबन्धसञ्चिकाश्च प्रकाश्यन्ते ।

३. ग्राहकीबुभूषद्भिर्दययया प्रथममेव मूल्यं प्रेषणीयम् ।

४. वर्षमध्ये ग्राहकीभवतामपि कन्यासंचिकादिरेव पत्रिका प्रेष्येत ।

५. एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

६. प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसंपादकाय प्रेषणीयाः ।

७. एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः (संस्कृतेन आङ्गल्या द्राविडया वा न तु भाषान्तरेण) ।

८. लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Tiruvadi P. O. Tanjore Dt.

निर्वाहकसम्पादकः— *Mimamsarnava*, *Mimamsakesari*
*Panditaraja* D. T. Tatacharya Siromani M. O. L.
Lecturer, Sri Venkateswara College,
TIRUPATI.

तदाकर्णितवान् मान्त्रिकः प्रशान्तः स्मितं कृत्वा 'आः ! स्वामिन्या अम्बायाः कियान् कोपो भवति। आर्यं वशीकर्तुं जानन्नहं अम्बां वशीकर्तुं किं न जानामि ? अत्र पश्य ; चू मन्त्रकालि, अनन्तरक्षणे स्वयमेव अम्बया धावितेन आगत्य मामाश्लिष्यन्त्या चुम्बितं दातव्यम्' इति वदन् स्वकीयमुष्णीषं एकेन हस्तेन अधस्तान्नुनोद । कटीस्थितमन्तरीयं उपरिस्थितं कञ्चुकं च अवमुच्य अपक्षिपति स्म । स्वकटीस्थितं असिमादाय तास्मिन् स्वमुखस्थां रज्जुं छिन्नवति तदीया दीर्घा दाढिः सपदि अवडीय अधः पपात। किमयमुन्मत्त इति तावन्मनितवती सा युवतिः विभ्रमं विस्मयं च प्राप्य तास्मिन् वशीकरणजाले पतिता मान्त्रिके बहुव्यामोहवती प्रधाव्य तदुपर्याप्लुत्य आश्लिष्य चुम्बितं दत्वा 'साधु । समीचीनो मान्त्रिकः। मां कियच्छीघ्रं वशीकृतवान् भवान्। 'चुम्बितं चुम्बितम्' इति नु उन्मादग्रस्तो भवति भवान् । 'यावन्ति तावन्ति ददामि । गृह्णातु भवान्। तथा वा मम पुरुषो मे वश्यो भवतु' इति भूयोऽपि तमालिलिङ्ग । अपनीतवेषः समयसञ्जीव्यार्यः स्वपत्नीसंलापेषु लग्नः चोरदृष्टिं पश्यन्नास्ते ।

---

## २४ अधिकारः ।

### (अद्य यावद्धिहितया व्यथयाऽलं परापर)

---

साम्बशिवस्यान्वेषणाय रङ्गराजोः शङ्खपट्टु प्रति प्रेषणानन्तरं कनकाम्बा स्वस्नुषयाऽधिशयितायाः खट्वायाः समीपे उपविश्य निर्निमेषं दृष्ट्वा स्वर्णाम्बाया मुखविक्रियां अवेक्षमाणा शिरोनिहितेन हस्तेन स्खलितपरिभ्रान्तेन मनसा च चित्रार्पितेव निश्चला अवर्तत। यद्यप्येवं तस्या शरीरं जडीभूतमभात् तथापि तस्या

मनः तदानीमेव पञ्जरावरुद्धा वनशुकीव तत्यन्ती अण्डबहिरण्डादि सर्वं गत्वा क्षणार्धेन न्यवर्तत । अतः उग्रविषेण क्रूरसर्पेण दष्टस्य या स्थितिर्भवेत् तादृशी तस्याः स्थितिरासीत् । वल्मीकात् पक्ष-पिपीलिका इव तस्या मनसि वेदनाः उत्सनीरवत् अभिवृद्धा उद-जृम्भन्त । सा स्वेषां तदानींतनीं स्थितिं प्रति चिन्तामकरोत । मेन-काया विवाहं निर्वर्त्य तां यदा मद्रं प्रैषयन् तस्मात् दिनात् प्रभृति तत्क्षणावधि तदीयस्य कुटुम्बस्य आपतितानि कष्टानि क्रमेण तस्या मानसरङ्गे आविर्भूय नर्तितुमारभन्त । पूर्वं कियत्यप्यैश्वर्ये वैभवे च स्थित्वा मानेन जीवितवतां स्वेषां बहुधा प्राप्तां दुरवस्थां, अन्ततः अत्यल्पस्य रूप्यशतद्वयात्मकस्य वित्तस्य अलाभेन अनुभूयमानं क्लेशं, अनघमाणिक्यभूतायाः स्वस्नुषायाः जीवितरक्षणे योग्यताविरहं च चिन्तयन्ती द्रवीबभूव । साम्बशिवस्य आगमनं यावत् स्नुषायाः प्राणैर्हि स्थातव्यमिति चिन्ताक्रान्ता ताम्यति स्म । हस्तौ पिपेष । क्वचिदपि अल्पे शब्दे उदिते किं साम्बशिव आगत इति उद्भ्रान्ता परिवर्त्य पश्येत् । आलयेषु स्थितान् देवान् सर्वान् मनसा प्रणम्य वाचा स्तुत्वा अञ्जलिं बद्ध्वा प्रार्थयाञ्चक्रे । स्वकुलदैवं तिरुपति-श्रीनिवासं भगवन्तं सस्मार । निमिषे निमिषे एकैकविधं अभिनव-मुपायनं 'समर्पयिष्यामि' इति सङ्कल्पयेत् । श्रीनिवास भगवन्, वेङ्क-टाचलपते, अद्यापि नु तव हृदयं नानुकम्पते । एतैर्दीनैरनुभूय-मानान् क्लेशान् किं न जानासि ? अय्यो, नह्यस्माभिः सह्यते । अलं तात, दैव । इतः परमपि वा किं ते करुणाकटाक्षोऽस्मासु न जायेत ? प्रथमं अस्य भिषजो मनसि प्रविश्य मत्स्नुषाया जीवितं किं न दद्याः ? जीवितायामस्यां अनन्तरमेव तामादाय आगत्य तव आलये अङ्गप्रदक्षिणं कारयिष्यामि । पिष्टदीपं आरोपयिष्यामि । स्वर्णमयीं अस्याः प्रतिमां कारयित्वा आनीय निधास्यामि । अस्या अपत्ये जाते तस्य त्वदालये शिखाविसर्जनं करिष्यामि । तात वेङ्कटाचल-पते श्रीनिवास भगवन् अनाथा वयं त्वयैव रक्षणीयाः । त्वां विना

नान्या गतिरस्माकमस्ति। हे कृपानिधे हे वात्सल्यनिधे हे सकलकल्याणगुणनिधे अज्ञातकपटं परमऋजुं मम पुत्रं यां काञ्चिदप्यापदं विना इह प्रापितवान् भव। इति बहुधा प्रार्थनां चक्रे। तञ्जापुरसमीपे 'मारि-अम्मन्-कोविल्' इत्यस्मिन् ग्रामे स्थितां वरप्रदां मारीं देवतां प्रार्थयत—'मातर्महामारि, सहस्रनयने, मदम्बिके, परदेवते, मद्गृहदीपिकां न प्रशमय। त्वदालये सर्वतः लक्षं दीपानारोपयिष्यामि। अस्या जीवनानन्तरं त्वदालयमहाप्राकारे पदप्रदक्षिणं कारयिष्यामि। यथा ते मनः प्रसादशीतलं भवेत् तथा 'हिमाम्बु'भिरभिषेकं कारयिष्यामि। इदं दीनमुखं पश्याम्ब। अस्मत्क्लेशं सर्वं पराणुद। अञ्जलिपूर्णं स्वर्णोपहारं समर्पयिष्यामि' इत्येकैकं दैवं सम्बोध्य सद्रवीभावं प्रार्थनां कृत्वा प्रणम्य उपविष्टा आसीत्।

ततः पूर्वास्मिन्नेव दिने आगमिष्यामीत्युक्तवान् साम्बशिवः केन कारणेन तदवधि नागत इति चिन्तामकरोत्। किन्तु जातु 'दिवाचौर्य' पुरे नीलकण्ठश्रेष्ठी न सन्निहितः? अथ वा पत्रलेखनादौ विलम्बः? यद्वा वित्तस्य आगमं प्रतीक्ष्य तस्मिन्नेव ग्रामे वर्तते? वित्तमादाय आगच्छन्तं साम्बशिवं किं नु स्तेनाः हत्वा वित्तमपहृतवन्तः स्युः? अथ वा स्वकीयां महतीमापदं अवमानं च असहमानः सः किं कापि आत्महत्यां कृतवान्? यद्वा उत्कोचग्रहणापराधाय तञ्जापुरमाण्डलिको हूणः शासनं विसृज्य कारागृहे न्यरुन्ध? इत्यचिन्त्यं सर्वं चिन्तयित्वा किमपि कर्तुं निश्चयमविन्दन्ती पर्याकुला अङ्गारोपरि कीट इव पर्यतप्यत। यथा गायकाः बहु 'सङ्गति'करणेन गीत्वा गीत्वा पुनः 'पल्लवी'मेव आश्रयेयुः तथा एकैकमपि विषयं वेङ्कटाचलपतिस्तोत्रे पर्यवसाययति स्म। मध्ये मध्ये मेनका वराहस्वामीत्येतयोरुभयोः स्मृतिरुदियात्। किं मेनका जीवति अथवा भूलोकं त्यक्तवती? जीवन्ती किं पतिगृहमागता अथवा क्वान्यत्र सन्तप्यते? इति बहुधा चिन्तयित्वा उन्मना अभूत्। रायपेट्टा-वैद्यशालां गत्वा वराहस्वामिनः स्थितिं ज्ञातुं किट्टं मुहुः प्रेषयेत्। जानुनि

शस्त्रचिकित्सां कृत्वा एकान्ते शायितत्वात् तद्दर्शनानुमतिर्न लभ्यत इति निवेदयेत् किट्टः । तेन वराहस्वामी जीवतीति ऊहमाना कनकाम्बा अल्पमाश्वासं लभेत । तोलशिक्षणेरुमाळ्-कोविल्-वीथ्यां स्थितस्य श्यामार्यस्य सकाशं गत्वा किं मेनकां प्रति कापि वार्ता लब्धेति वेदितुं किट्टं प्रेषयेत् । सः अर्धनाडिकया प्रतिनिवृत्तः तां प्रति या कापि वार्ता न लब्धेति ब्रूयात् ।

तदाकर्णनसमनन्तरं कनकाम्बा 'प्राचीनगीतिं' प्रारभेत । हंहो अस्मत्कुटुम्बेन एवं नु विशीर्णेन भाव्यम् । कस्य नु कुटुम्बं वयं व्यघटयाम । कस्य नु स्वमपाहराम । कं नु प्रहृत्य चित्रवधमकुर्म । तावन्ति पापानि संघातेनागत्य युगपत् किल पीडितवन्ति । अहो दैव, इयतीभ्य आपद्भ्यः कथं वयं विमोक्ष्यामहे ? मम पुत्रेण हि आगन्तव्यम् । मम मेनकया आगन्तव्यम् । मम स्वर्णेन जीवितव्यम् । मम वराहस्वामिना जीवितव्यम् । मम मेनकया भर्त्रा सह वसन्त्या भाव्यम् । गतेन उद्योगेन मानेन च निवर्तितव्यम् । एतत् सर्वं किमुपनमेत् । एतत् सर्वं किं मनुष्यसाहाय्येन संपद्येत । जगदीश, जगद्रक्षक, श्रीनिवास, श्रीशैलभगवन्, किं नु ते कृपा अस्मासु उद्भवेत् ? त्वत्कटाक्षः कच्चिदस्मासु पतेत् ? अस्मत्कृतानामपराधानां दण्डः किमद्यापि नावसानमेति ? क्षुद्रस्य मशकस्य शिरसि महीधरवत् यत् परमदुर्गतानस्मान् एतावन्ति कष्टानि युगपत् पीडयन्ति तत् कथं वयं सहेमहि ?' इति कनकाम्बा उपर्युपरि विलपन्ती भगवन्तं पुनः पुनः प्रार्थयमाना मूर्तामिव व्यसनं, रूपवतीव आतुरता, औत्सुक्यमयी, निराहारा, निर्निद्रा, म्लाना, विसंस्थुला द्रवीभूता, तस्थौ ।

आद्यदिनद्वये शववत् शयिता स्वर्णाम्बा उच्छ्वासनिश्वासौ सम्यक् कुर्वती तदा तदा गुङ्कारं मणनं च कर्तुमारभत । तद्दर्शिनी कनकाम्बा 'किं नु तदानीमेव तस्याः प्राणाः संस्थास्यन्ते' इति चिन्तया अतिभीता आकुलीभूता 'स्वर्ण स्वर्ण' इति मृदु आजुहाव ।

मरुज्जगत्प्राणसमीरणा इत्यमरः । मुखैः स्वीयवक्त्रैः पञ्चशीर्षनागादिविवक्षया बहुवचनं, सैषा पञ्चमुखी तुष्टिश्शेषसृष्टिरिवापरस्यन्यत्रोक्ते ; विषं गरळं उद्गिरन्तः वमन्तः द्विजिह्वाः एकैकमुखे जिह्वाद्वयवन्तः जिह्मवृत्तयः कुटिल-गमनाः, अराळं वृजिनं जिह्ममित्यमरः । सर्पगतेर्वक्रतास्वाभाव्यात् । तथाविधा-स्सर्पाः तद्वासादिस्थानसुदूरमार्ग एव परिहर्तव्याः परित्याज्याः । उक्तं हि— 'सर्पादिवत् त्वदपराधिषु दूरयाता' इति । काळियादिसर्पपरत्वे तु जगतां पशु-मनुष्यादीनां प्राणान् भक्षयन्तः तत्र हेतुः (उद्गिरन्त इति) मुखैः पञ्चभिः विषं जलेषु प्रक्षिपन्तः तद्ध्रदमात्रस्य विषजलप्रायतामापादयन्तः तद्वायु-सम्बन्धभयेन भगवता सुदूरदेशे प्रक्षेप्तव्या इति भावः ।

अन्योऽपि श्लिष्टकाव्यपरो बोधः—

जगतां प्राणाः प्राणस्थानीयत्वेनाभिमताः ध्वनयो रसा वा । ध्वनिः काव्यस्य जीवितं, रस एवात्र जीवितमिति मतभेदात् । तान् निगिरन्तः अप्रकाशयन्तः । निगीर्याध्यवसानमित्यादौ विषयाप्रकाशबोधनात् । ध्वन्यादि-शून्या इत्यर्थः । विभज्यते हि त्रेधा काव्यपद्धतिः 'काव्यं ध्वनिर्गुणीभूतव्य-ङ्ग्य चित्रमिति त्रिधे'ति । तत्र ध्वनिरसादिप्रधानं काव्यमुत्तमम् । ....केवल-शब्दवैचित्र्यमात्रप्रधानं चित्रकाव्यमधममिति । ततश्च शब्दश्लेषप्रधानस्य श्लिष्टकाव्यस्य प्रायशो ध्वनिरसादिदवीयस्त्वं सुव्यक्तमिति । मुखैः बहुविध-पदविच्छेदप्रकारैः विषं मनोमोहजनकं गूढार्थभेदं बोधयन्तः । जिह्मवृत्तयः अलसशक्त्यादिवृत्तयः आलस्यं च अर्थबोधनविलम्ब एव । जिह्मस्तु कुटिले ऽलस इत्यमरः । प्रायशो श्लिष्टकाव्येष्वर्थबोधनविलम्ब आनुभविक इति भावः । द्विजिह्वाः पिशुनपरत्व इवात्रापि जिह्वाशब्दोऽर्थबोधपरः । स चात्रोभयविध इति एकस्य पदस्यार्थद्वयबोधनात् द्विजिह्वत्वमिति बोध्यम् । तथाविधाः श्लिष्ट-काव्यभेदा दूरतः परिहर्तव्याः । तादृशकाव्यकरणश्रवणादिकमनावश्यक-मिति भावः । अत्र च द्विजिह्वशब्देनार्थद्वयमात्रबोधककविराक्षसीयादयो गृह्यन्त इति बोध्यम् । अत एव नात्र स्वग्रन्थव्याघातः, स्वग्रन्थस्यास्याने-

कार्थपरिपुष्टत्वात् ध्वनिरसादिबाहुल्याच्च । तद्विरहितकेवलक्लिष्टार्थपरश्लिष्ट-काव्यगोचर एवायं श्लोक इति न दोष इति ध्येयम् ।

एवं स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले । परिहर मधुसूदनप्रपन्नान् प्रभुरहमन्यनृणां न वैष्णवानाम् ॥ कमलनयन वासुदेव विष्णो धरणिधराच्युत शङ्खचक्रपाणे । भव शरणमितीरयन्ति ये वै त्यज भट दूरतरेण तानपापान् ॥ इति श्लोकद्वयार्थोऽप्यत्रानुसार्यते । तथा हि—जगत्प्राणान् निगिरन्त इति अनेन मृत्यव उच्यन्ते । कल्पभेदेन भेदात् बहुवचनम् । ते च विषं स्वपुरुषं प्रति, मुखैः साक्षात् स्ववक्त्रैः, एवमुद्गिरन्तः वदन्तस्सन्तीत्यन्वयः । विषमित्यत्र शषयोरभेदात् विश-मिति विपरिणामः कोशः कोष इतिवत् । यद्वा षकारान्तोऽपि विट्शब्दो नैघण्टुकसम्मतः । अत एव विश्वमेदिन्योष्षकारान्तप्रकरणेऽपि विट्शब्दः परिगण्यते । स च जनार्थकोऽपि ; विड्वैश्ये जनेन षण्णिति (?) वैजयन्ती-कोशात् विट्पुंसि मनुजे वैश्य इति मेदिनीकोशाच्च । प्रयोगोऽपि 'यथा राजा विशा' ; विशांपतिरित्यादिर्वेदलोकयोः । अतश्च विषमित्यनेन स्वपुरुषशब्दार्थो विवृतः । पुरुषान्तरमुखेन कथने अषट्कर्णताविरोधात् मुखैरित्युक्तम् । एतेन तच्छ्लोकपूर्वार्द्धार्थ उक्तः । अथोत्तरार्द्धार्थमनुवदन् मृत्युवाक्यप्रकारमाह— (दूरत इति) दूरत इत्येतत् कमलनयनेति श्लोकगतदूरतरेणेतिपदार्थानुवादः । परिहर्तव्या इत्येतत् परिहर त्यजेत्यनयोः श्लोकद्वयगतयोः । द्विजिह्वा इत्यनेन द्व्यर्जिह्वाश्शरणागता उच्यन्ते । द्वाववयवावस्येति विग्रहाद्धि द्वयशब्दोऽव-यवद्वयविशिष्टं मन्त्रमभिधत्ते । तदेवावयवद्वयमत्र द्विशब्देनोच्यत इति द्वौ जिह्वायां मन्त्रखण्डौ यस्येति विग्रहो बोध्यः । 'सकृदुच्चारस्संसारतारको भवती'त्युक्तसकृदुच्चारणं वा 'सकलं कालं द्वयेन क्षिपे'त्युक्तसदाकीर्तनं वाऽत्र द्विजिह्वशब्देनोच्यत इत्यवसेयम् । यद्वा 'सततं यस्य जिह्वायां हरिरित्य-क्षरद्वय'मिति वचनप्रत्यभिज्ञानात् द्विशब्देन तादृशाक्षरद्वयमेवोच्यत इति नामकीर्तनपरा बोध्यन्त इति बोध्यम् । कथमत्र मृत्युपुरुषप्रसक्तिरिति चेत्

तत्राह (जिह्मेति)। जिह्मवृत्तयः अलसव्यापाराः वृत्तिक्लेशादिना यत्किञ्चित् गौणकृत्यमनुतिष्ठन्त इत्यर्थः। अत्र 'सर्वं जिह्मं मृत्युपदमार्जवं ब्रह्मणः पद'-मिति महाभारतोक्तेः श्रीवैष्णवानामपि जिह्मवृत्तीनां मृत्युपदत्वमस्तीति तेषा-मभिप्रायः। तान् प्रति जिह्मवृत्तयोऽपिप्रपन्ना दूरतः परिहरणीया इति मृत्यवो वदन्तीति इतिशब्दपूरणेनान्वयबोध उन्नेय इति बोध्यम्। अथवा परि-हर्तव्यादिति छेदः। द्विजिह्वाः द्विःपक्षिपरमात्मनोरिति मद्रुमाणः सः जिह्वायां येषां ते। कमलनयनादिपरमात्मवाचिशब्दोच्चारयितारः परिहर्तव्यात् दूरतः दूराद्दूरतरमितिवत् अत्यन्तपरिहर्तव्या इत्यर्थः इति मृत्यवो वदन्तीत्यन्वयः।

एवं लुब्धदुष्प्रभुपरोऽपि—

ते च द्विजिह्वाः धिग्धिक् जाल्म जाल्म गच्छ गच्छेति द्विरुक्ति-जिह्वाः एकशब्दस्य द्विवारमुच्चारयितारः कोपवेगादित्यर्थः। जगतां प्राणान् निगिरन्तः प्राणत्यागपर्यन्तमानभङ्गमुत्पादयन्तः। उच्यते हि— नवीन-दीनभावस्य याचमानस्य मानिनः। वचोजीवितयोरासीत्पुरो निस्सरणे रणः॥ इति। तथा च मानिनां याच्ञाप्रवृत्तिरेव प्राणनिस्सरणहेतुः याच्ञाभङ्गस्तु सुतरा-मिति भावः। मुखैः विषतुल्यान् दुर्जल्पानुद्गिरन्तः जिह्मवृत्तयः धनमदा-दलसव्यापाराः तद्दर्शनमेव विलम्बलभ्यमिति भावः। दूरतः परिहर्तव्याः। 'लुब्धद्वारदुरासिकापरिभवैस्तोषं जुषेथा मनः, दुरीश्वरद्वारबहिर्वितर्दिकादुरा-सिकायै रचितोऽयमञ्जलिः' इति दत्तजलाञ्जलिप्रक्षेपं तद्गृहद्वारसम्बन्धोऽपि परिहरणीय इति यावत्।

एवं मेघपरतयापि—

जगतः प्राणप्रदं पञ्चवृत्तिप्राणतुल्यत्वनिर्देशात् बहुवचनं विषं जलं निगिरन्तः समुद्रादाववतीर्य भक्षयन्तः मुखैः मुखस्थानीयैः पार्श्वभागैः उद्गिर-न्तः उद्वमन्तश्च द्विजिह्वाः पार्श्वद्वये जिह्वासदृशविद्युद्विशिष्टाः जिह्मवृत्तय-इतस्ततः कुटिलं पर्यटन्तः मेघाः दूरतः परिहर्तव्याः। वर्षणसमये मेघवृतप्र-देशादन्यत्रापसरणं कर्तव्यमिति भावः। अन्यथा वृष्टिवज्रादिपातस्यादिति।

यद्वा परिहर्तव्यादिति पदच्छेदः । विजिह्वाः विविधविद्युज्जिह्वाः जिह्वामन्तरेण निगिरन्त उद्गिरन्तश्चेति विरोधाभासो वा, अत एव कपटवृत्तयः ऐन्द्रजालिकवत् परिहर्तव्यात् दूरतः उपद्रवकारिणोऽप्युपेक्षणीया एव ।

एवं जैनादिपरतयापि—

जगतः प्राणान् प्राणो ब्रह्मेत्युक्तं परं ब्रह्म प्राणस्थानीयान् वेदान् वा निगिरन्तः अपलपन्तः विषं विषतुल्यं विरुद्धवाक्यं स्यादस्ति, स्यान्नास्तीत्यादिकं उद्गिरन्तः । अत एव द्विजिह्वाः जिह्वाशब्दविवक्षितवाग्द्वयशालिनः सर्वेषु सत्त्वमसत्त्वं च स्थापयन्तः जिह्मवृत्तयः इन्द्रजालादिकपटव्यापारनिरताः । उक्तं हि—शिथिलोदयसप्तभङ्गिशिक्षाविषमोपन्यसनव्यथाविलक्षाः । मलिनास्त इमे मयूरपिञ्छभ्रमणैरेव विलोभयन्ति मन्दानिति । ते च दूरतः परिहर्तव्याः । बुद्धरुद्रादिवसतिं श्मशानं शवमेव च । अटवीं राजधानीं च दूरतः परिवर्जयेत् ॥ इति शास्त्रविधानादिति भावः । उक्तं हि सङ्कल्पसूर्योदये—अमीषामादित्यस्तम्भनपाषाणस्फोटनप्रतिमाजल्पनादिविप्रलम्भोपायानां भवत्प्रसाद एव प्रतिक्षेपकर्ता उत्सार्यन्तामेते दृष्टिगोचरादिति ।

अत एव रुद्रपरोऽपि बोधः—

ते च संहाराधिकृतत्वात् जगत्प्राणान् प्रळयेषु भक्षयन्तः मुखैः स्वकण्ठैः विषं उद्गिरन्तः प्रकाशयन्तः नीलकण्ठत्वात् विषं भुक्तमेभिरिति ख्यापयन्त इत्यर्थः । द्विजिह्वाः रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोरान्याशिवान्या यच्छतरुद्रीयं जुहोति यैवास्य घोरातनूस्तां तेन शमयति यद्वसोर्धारां जुहोति यैवास्य शिवातनूस्तां तेन प्रीणातीत्युक्तदेहद्वयवत्त्वात् जिह्वाद्वयविशिष्टाः, जिह्वाग्रहणमत्र जगद्ग्रसनाधिकृतत्वात् त्याज्यतानिमित्तं द्योतयति । जिह्मवृत्तयः अतिक्रूरव्यापाराः रुद्रो वै क्रूर इत्याद्युक्तेः दूरतः परिहर्तव्याः तदीयपर्यन्तं दूरपरित्याज्याः । उक्तं हि—शैवान् प्रति सङ्कल्पसूर्योदये 'एते च नैगमिकधर्मकळमोपमर्दिनः कडंगरीया इव दूरतः परिहरणीया इति ।

# उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु. २१] कलि ५०४९ सर्वधारि { वृषभ कर्कट } साधारण सं ९, ११ { मिथुन सिंह } शास्त्रानुबन्ध सं १०, १२ आहत्य ,, १२

## संस्कृतम् ॥

संस्कृतस्य हिन्द्या सह वैकल्पिकं स्थानं दत्तमिति ज्ञायते । उभे अपि एते भाषे ये बाला अधिगन्तुमिच्छन्ति तेषां तत्र सौकर्यमिह प्रतिरुद्धम् । विद्यामन्त्रिणः सविधे सम्यगेतदुपपादनीयम् । अखिलभारतभाषा हिन्दी अभ्यसितव्या न वेति विकल्पो निरवकाशः । उद्योगमिच्छन्त इदानीं कलाशालासु अधीयते । राज्यभाषानभिज्ञस्य कथमुद्योगलाभ इति सर्वस्तां नियमेन अभ्यस्येत् । संस्कृतमुपेक्षेत ।

'गच्छतु संस्कृतम् । किं तेन ?' इति तु न वाच्यम् । राज्यशासने स्थितैः देशस्य उन्नतिं कामयमानैः, सर्वप्रजाहितकारिभिः सर्वासु भाषासु, सर्वासु विद्यासु, सर्वासु प्रजासु समदृष्टिभिः सप्रेमभिः हितकारिभिर्भवितव्यम् । चिरन्तनी बहुग्रन्थमयी ऐहिकामुष्मिकसकलश्रेयोनिदानतया असाधारणबहुमानास्पदीभूता संस्कृतभाषा 'गच्छतु' इति यदि केचन वदन्ति तेषां तत्त्वबोधनमपि कर्तव्यम् । संस्कृततिरोभावे नायमस्मद्देशो भवेत्, अपि तु यः कोऽप्यन्यः । तदास्ताम् । हिन्द्या सह वैकल्पिकतया संस्कृतकल्पने संस्कृतं सर्वथा परित्यक्तप्रायमेव । प्रदेशभाषया तु

वैकाल्पिकता परिकल्पनीया। ये संस्कृतं नेच्छन्ति ते प्रदेशभाषामेव केवलमभ्यसिष्यन्ति। एवंविधाश्च भूयिष्ठा भविष्यन्ति। तेन प्रदेश-भाषाप्रचारस्य नास्ति मनागपि विघातः। ये संस्कृतमिच्छन्ति ते तदभ्य-सिष्यन्ति। एवंविधा विरला एव स्युः। अथापि अल्पशः संस्कृतमपि प्रचारे वर्ततेति संस्कृतपक्षपातिनां सर्वेषामत्र तृप्तिर्भवेत्। संस्कृताध्यायिनां कलाशालासु उपाध्यायपदप्राप्तया जीवनमपि स्यात्। संस्कृतकलाशालाश्च जीवेयुः।

न च संस्कृताध्यायिनां देशभाषाज्ञानविरहेण उद्योगायोग्यता। गृहे तन्म-येन व्यवहारेण आरम्भकलाशालाशिक्षया च न कश्चिदपि देशभाषाऽनभिज्ञो भविष्यति। मध्यमकलाशालासु सर्वं पाठनं देशभाषयैव क्रियमाणं तत्र अपे-क्षितं परिचयं परिपूर्णं सम्पन्नं कारिष्यति। प्रदेशभाषायां अगाधं पाण्डित्यं न भविष्यतीति सत्यमेतत्। तावता का हानिः। न हि उद्योगाय लौकिकव्यवहाराय वा परमं पाण्डित्यमपेक्षितम्। तेन तत्तदिच्छया प्रदेश-भाषायां वा संस्कृते वा ये परिचयमिच्छन्ति तेषामुभयेषां सौकर्यमनुरुध्य भाषास्थानव्यवस्था कल्पनीयेति अतिविशदं निरूपणं कर्तव्यम्।

---

## केचन विशेषाः॥

(V. R. Srinivasa Tatacharya Siromani)

वेणीसंहारे षष्ठाङ्के पाञ्चालकमहावाक्ये 'ततः ससम्भ्रमं प्रस्थिता-स्सर्वे वयं तमेव पुरस्कृत्य गत्वा च सरस्तीरं परिज्ञायमानसुयोधनपद-लाञ्छनां पद्धतीमासाद्य भगवता वासुदेवेनोक्तं' इत्यवान्तरवाक्यं लक्ष्यते। अत्र पुरस्कृत्य गत्वा आसाद्येति ल्यबन्तार्थक्रियासु वयंशब्दार्थ-स्योक्तमित्यत्र वासुदेवस्यान्वयः प्रतीयते। सनयुक्तः ल्यबन्तार्थान्वितस्य वयमिति प्रथमान्तार्थस्य कर्मत्वज्ञाने वासुदेवसाधकर्तृके उक्तमित्यत्र

वासुदेवेनेत्यस्येवान्वयायोगात् कर्तृप्रत्ययान्तक्रियापदार्थे एव तस्यान्वयसंभवात्। क्वचित्पुस्तके पुरस्कृत्येत्यनन्तरं विरामचिह्नस्य मुद्रणेपि गत्वा आसाद्येत्यत्र वयंपदार्थस्यैव कर्तृत्वेनोक्तानुपपत्तेस्तादवस्थ्यात्। किञ्च क्त्वाप्रत्ययोऽप्यत्र न घटते समानकर्तृकत्वविरहात्। गत्वा आसाद्येत्यत्र वयंपदार्थः कर्ता। उक्तमित्युक्तवचनक्रियायां तु तदन्तर्भूतो वासुदेवः कर्ता। न च गमनादिक्रियायां समुदायान्तर्भावेण वचनक्रियायां पार्थक्येन च वासुदेवस्य कर्तृत्वात् समानकर्तृकत्वमव्याहतमिति वाच्यम्। समानकर्तृकयोरित्यस्यान्यूनानतिरिक्तकर्तृकयोरित्यर्थात्। न हि देवदत्तयज्ञदत्तविष्णुमित्राः स्नात्वा वासः परिधाय देवदत्तेन भुक्तमित्येवंजातीयकः प्रयोगो दृश्यते। तस्मादयं प्रयोगो विचार्यः। यदि तु पुरस्कृत्येत्यस्य वाक्यान्तत्वेन प्रस्थानक्रियायामन्वयः गमनासादनयोस्तु वचन इव वासुदेवस्यैव कर्तृत्वेनान्वय इतीष्यते तदा नानुपपत्तिः। परन्त्वत्र ग्रन्थस्वारस्यं चिन्तनीयम्।

तत्रैवोपरि युधिष्ठिरकृततर्पणे 'एष तावत्सलिलाञ्जलिर्गाङ्गेयाय भीष्माय गुरवे प्रपितामहाय शान्तनवे। अयमपि पितामहाय विचित्रवीर्याय। (साम्प्रतम्) तातस्याधुनावसरः। अयं तावत् स्वर्गस्थिताय सुगृहीतनाम्ने पित्रे पाण्डवे' इत्यादिवाक्यानि लक्ष्यन्ते। धर्मशास्त्रसम्मतं पितृपितामहप्रपितामहक्रमेण तर्पणादिकं सर्वैरनुष्ठीयते। अत्र तद्वैपरीत्येन गुरुभूतज्येष्ठपितामहभीष्म, प्रपितामहशान्तनु, पितामहविचित्रवीर्य,पितृपाण्डु,-सोदरक्रमेण तर्पणानुष्ठाननिबन्धनं कथमुपपद्यते। एतदपिविमृष्टव्यम्। अत्र व्याख्याने अप्पाशर्मविद्यावाचस्पतिः अभिप्रवेशो युधिष्ठिरेण 'सहितावेवाभ्युदयमुपभोक्ष्यावहे' इति वाक्येनाभ्युदयोऽकथ्यत। तन्निमित्तकस्यास्य तर्पणस्य 'आभ्युदयिके तु व्युत्क्रमो गारुडे प्रदर्शित' इति भट्टकमलाकरवचनात् व्युत्क्रमत्वम्। जीवतो भीष्मस्य तर्पणं जीवच्छ्राद्धतुल्यमित्यादिकमवदत्।

कर्मधारयविग्रहविषये विशेषो दृश्यते। नीलश्चासौ घटश्च, नीला च सा लता च, नीलञ्च तदुत्पलञ्चेति विग्रहवाक्येषु समानलिङ्गकानां नीलघटादिपदानां सामानाधिकरण्यस्य प्रत्यायनाय मध्ये समानलिङ्गका अदश्शब्दादयः प्रयुज्यन्ते। यत्र समस्यमानपदयोर्भिन्नलिङ्गत्वं तत्र विग्रहे मध्ये प्रयुज्यमानस्य सर्वनाम्नः पूर्वपदलिङ्गमुत्तरपदलिङ्गं वा भवति। तत्र पूर्वपदलिङ्गपक्षे 'मुखद्वितीया वा नासिका वचनमस्य सोऽयं मुखनासिका-

वचनः' इति महाभाष्यविवरणभूतः 'मुखद्वितीयेति मुखसहायेत्यर्थः । तत्र नासिका मुखसाहचर्यात् मुखशब्देनोच्यते । मुखं च तन्नासिका च मुखनासिका । सा वचनमस्येति' इति प्रदीपः प्रमाणम् । उत्तरपदलिङ्ग-वत्त्वे तु नैषधप्रथमसर्गस्थस्य 'दोहदधूपिनि' इत्यस्य 'दोहदश्चासौ धूपश्च तद्वति' इति मल्लिनाथव्याख्यानवाक्यं प्रमाणम् । उभयोरपि ग्रन्थयोः प्रामाण्यादन्यतरेणान्यतरस्य बाधो न युज्यते ।

'परोक्षे लिट्' इति सूत्रे महाभाष्ये 'परोक्ष इत्युच्यते । किं परोक्षं नाम । परमक्ष्णः परोक्षम् । अक्षि पुनः किम् । अश्नोतेरयमौणादिकः करणसाधनः क्सिप्रत्ययः । अश्नुते अनेनेत्यक्षि । यद्येवं पराक्षमिति प्राप्नोति । नैष दोषः ।' इति भाषित्वा 'परोभावः परस्याक्षे परोक्षे लिटि दृश्यताम् । उत्त्वं वाऽऽदेः परादक्ष्णः सिद्धं वाऽस्मान्निपातनात्'इति वार्तिकं दृश्यतामित्यन्तं वाक्यं 'परशब्दस्याक्षशब्दे उत्तरपदे परोभावो वक्तव्यः' इति, 'उत्त्वं वाऽऽदेः परादक्ष्ण' इति खण्डम् 'अथवा परशब्दादुत्तरस्या-क्षिशब्दस्योत्वं वक्तव्यम्' इति, 'सिद्धं वाऽस्मान्निपातनात्' इति शकलम् 'अथवा निपातनादेव सिद्धं 'परोक्षे लिट्' इति' इति च व्याख्यायत । अत्र आद्यं वार्तिकखण्डद्वयं सभागनिपातनपरम् । तृतीयं खण्डं तु निर्भाग-समुदायनिपातनपरम् । अत्रप्रदीपे मयूरव्यंसकादित्वात्समासे समासान्ते-नाचा, अव्ययीभावभिन्ने समासे 'प्रतिपरसमनुभ्योऽक्ष्ण' इति विहित-टचा वा परोक्षशब्दस्सिद्ध्यतीत्यभ्यधीयत । शिष्टप्रयोगसङ्ग्रहे पूर्वोक्त-वार्तिकं भाष्यत्वेनोपादाय एतत्पदयुक्ततया स्वेन कल्पितस्य 'सिद्धं वै तन्निपातनात्' इत्यस्य निपातनात् सुघटितरूपस्यैव साधुत्वमित्याशयो-ऽवर्ण्यत । तदुपरि 'अयं च सुः कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समा-सवच्च बहुलम् ।' 'असमासवद्भावे पूर्वपदस्थस्य सुपस्सुर्वक्तव्य' इति विहितस्सुः । अन्योन्यपरस्परादिशब्दवत् । 'छन्दसि दृष्टानुविधिः' इति बाहुलकात् परोक्षादिस्थलेषु च प्रवर्तते' इत्यादि कथयित्वा वार्तिके तृतीयखण्डस्य परोक्षं वा अन्ये इत्यादिस्थलेषु क्रियमाणायाः परोक्ष-मिति परः+अक्षम् इति वेष्टनाया आनुगुण्यमभिधाय 'इत्थं च सति कौमुद्यां परोक्षशब्दे परशब्दस्यौकारादेश इत्यादि तच्च वैदिकप्रयोगे वेष्टनाऽज्ञानमूलकमिति स्पष्टम्' इत्यभण्यत । एतत् प्रदीपाननुगुण-मिव भाति । प्रदीपे सिद्धं वेति वार्तिके 'निर्भागस्समुदाय एवेन्द्रिया-गोचरार्थवाची निपात्यत इत्यर्थः' इति व्याक्रियत । अनेन परोक्षशब्दो

ऽखण्डः। आद्यपक्षद्वय इव तत्र परोक्षशब्दयोः संयोगः तत्प्रयुक्तविकारश्च नाभ्युपगम्यत इति प्रतीयते। आद्यपक्षद्वये स्वन्तपरशब्दघटितायाः परः+अक्षमिति वेष्टनाया आनुगुण्ये अविद्यमाने अखण्डः परोक्षशब्द इति तृतीयपक्षे कथमानुगुण्यं भविष्यति। छान्दोग्ये 'परोवरीयस्सामोपासीत' इत्यत्र 'वरीयस्त्वं ज्येष्ठत्वम्। परस्त्वं श्रेष्ठत्वम्। परस्त्वे सति वरीयस्त्वं परोवरीयस्त्वम्। परशब्दस्सान्त' इति श्रीमद्रङ्गरामानुजमुनिभाष्यम्। तत्राभ्युपेतस्य सान्तस्य परश्शब्दस्याक्षिशब्दस्य च मयूरव्यंसकादित्वात्समासे समासान्तेऽचि श्रौतपरोक्षशब्दो निष्पद्यते। एवं सति परः+अक्षमिति वेष्टना(अवग्रहः) उपपद्यत एव। परशब्दस्येव परश्शब्दस्यापि नानार्थत्वमूरीकृत्य परोक्षमित्यत्र परश्शब्दस्य विवक्षितार्थपरत्वं समर्थनीयम्। परोक्षशब्दादिपु क्लेशेन निर्व्यूढः पूर्वपदस्थस्य सुपस्सुप्तु परस्त्वमित्यादिप्रयोगेष्वसमस्तेपु न भवेत्। अतः परश्शब्द आवश्यक इति ध्येयम्।

---

पेक्स्पिअर् - कृतं

# यथाभिमतम्॥

राजा सह प्रभुभिः प्रविशति।

राजा— आर्ये, शक्यया त्वरया प्रतिष्ठस्व। अस्मदास्थानादपेहि।

रोसलिन्द्— मां, पितृव्य?

राजा— त्वां, भ्रातृपुत्रि। एषु दशसु दिनेषु यदि त्वं अस्मदास्थानस्य विंशतिशिला*सन्निहिताऽपि वा भवेः ततस्त्वं तेनापराधेन म्रियेथाः।

रोसलिन्द्— अत्र भवन्तमनुनाथामि— अयं मे अपराध इति ज्ञातुं मामत्र भवाननुमन्तुमर्हति। यदि ममान्तःप्रज्ञा अस्ति, यदि मम अभिलाषा मे परिचिताः, यद्यहं स्वप्नावस्थायां न वर्ते न वा उन्मत्ताऽस्मि, यथा दृढमहं प्रत्येमि, नाहमुन्मत्तासीति, तर्हि प्रिय पितृव्य, अनुत्पन्नायां चिन्तायामपि तत्र भवति नाहं कदाचिदपि अपराद्धवत्यस्मि।

---

* शिला-mile

राजा— एवं सर्वे द्रोहिणः कुर्वन्ति †। यदि तेषां विशुद्धता केवलमुक्ति-मयी स्यात् ते नूनं तथा साधवः यथा गुण एव साक्षात् । त्वयि तु इदं पर्याप्तं यत् त्वयि मे न विश्वास इति ।

रोसलिन्द्— तथापि भवतोऽविश्वासः न मां द्रोहिणीं कर्तुमलम् । कथयतु भवान् संभावितः कोऽपराध इति ।

राजा— त्वं तव पितुः पुत्र्यसि । तत् समग्रमस्ति ।

रोसलिन्द्— तथाऽहमासं यदाऽत्रभवान् राज्यं पर्यग्रहीत् । द्रोहो न दाय-क्रमेणाधिगम्यते, प्रभो । अथ यदि सुहृदां सकाशात् तत्प्राप्तिर्भवति ततः किं मम ? मम पिता न द्रोही । तदार्य प्रभो न मां तथा विप-रीतं गृहाण यथा मम दारिद्र्यं द्रोहपर्यायं स्यादिति ते मतिर्भवेत् ।

सिलिआ— प्रिय महाराज, शृणु मां भाषमाणाम् ।

राजा— अये सिलिए, तवार्थे वयमिमावर्तयाम । अन्यथा पितुः सदेशा इयमभविष्यत् ।

सिलिआ— नाहं तदा अस्याः स्थापनं प्रति अनुनायनमकरवम् । स तवैव प्रसादः, अनुतापश्च । तावद् बाल्यं मे तदा बभूव यावता अस्या गौरवं न मया विदितमासीत् । इदानीं तु इमामहं जानामि । इयं चेत् द्रोग्ध्री, नूनं अहमपि तथा । इदानीमपि सह सुप्ते अभूव । एकस्मिन् क्षणे उत्थिते । सह पठितवत्यौ । सह विहृतवत्यौ । सह भुञ्ज्वहे । जूनो-अस्या हंसाविव अविनाभूते द्वन्द्वं चरावः ।

राजा— अस्या अगाधत्वं तव दुर्ग्रहम् । अस्या मसृणता, मौनमात्रं, क्षमा च जनैः संलपन्ति §। ते अस्यामनुकम्पां कुर्वन्ति । त्वं मूढा । तव अभिख्यां सा अपहरति । तस्यां गतायां उज्ज्वलतरा गुणवत्तरा च

---

† स्वैरोपभवत्वमभीत्यर्थः । § सम्भाषणं कृत्वैव तान् आपद्येऽभ्यत्यर्थः ।

त्वं भास्यासि । अतो न मुखमुद्घाटय । इमां प्रति मया कृतं शासनं ऊर्जितं अविपर्यसनीयम् । एषा विप्रवासिता ।

सिलिआ— मय्यपि तच्छासनं कुरु, राजन् तस्याः सान्निध्यं विना न मे जीवनं शक्यम् ।

राजा— त्वं मूढा । त्वं भ्रातृपुत्रि कुरु संविधानम् । यदि कालमतिक्रम्य स्थास्यसि, मम गौरवेण शपे, ममाज्ञया मरिष्यसि ।

[ निष्क्रामति राजा, प्रभवश्च ]

सिलिआ— अयि तपस्विनि रोसलिन्द्, क नु त्वं गमिष्यसि ? अपि नाम पित्रोर्विनिमयं कुर्याः ? मदीयं ते दास्यामि । आदिशामि त्वां न मत्तस्त्वं दुःखिततरा भवितुमर्हसि ।

रोसलिन्द्— मम बलीयान् हेतुरस्ति ।

सिलिआ— नास्ति पितृव्यपुत्रि । प्रार्थये प्रहृष्टा भव । किं त्वं न जानासि राजा मां तस्य पुत्रीं विप्रवासितवानिति ।

रोसलिन्द्— न तत् स कृतवान् ।

सिलिआ— न ; न कृतवान् ? तर्हि रोसलिन्द्-अस्याः तत्प्रेम नास्ति यत् त्वामुपदिशति त्वं चाहं च एकेति । किमावां विभक्ते वियुक्ते भवेव, रुचिरे कन्ये ? न । मम पिता अन्यं दायादं मृगयतु । अतो मया सह पर्यालोचय कथमावाभ्यां पलायितव्यम्, कुत्र गन्तव्यम्, किं सह नेतव्यमिति । न मति कुरु—तव जातं विपर्ययं स्वयमेव वोढुं, स्वदुःखं स्वयमेव अनुभवितुं , मां परित्यक्तुं च । यतः, दैवेन शपे, अस्मदीये अस्मिन्नतिदुःखे, ब्रूहि यत् शक्यम्, त्वया सह अहं गमिष्यामि ।

रोसलिन्द्— भवतु । कुत्र आवाभ्यां गन्तव्यम् ?

सिलिआ— आर्देन्-वने मम पितृव्यमन्वेष्टुम् ।

रोसलिन्द्— अहो । कियदपायकरमेतत् आवयोः स्त्रियोः सत्योः, यत् ताव-द्दूरं प्रयाणमिति ।

सिलिआ— अहमात्मानं कच्चरेण दीनं परिधास्यामि ! वर्णेन वदनं लेप्स्यामि । त्वमप्येवं कुरु । एवं प्रयास्यावः, घातुकानां प्रोत्साहनमकुर्वत्यौ ।

रोसलिन्द्— सामान्यतः (स्त्रियः) यावदुच्छ्रिता भवन्ति ततोऽधिकतरमुच्छ्रिताऽस्मि । तेन कात्स्न्र्येनाहं यदि पुरुषवेषं धारयामि तत् किं न युक्ततरं भवेत् ? ऊरौ उदारः कश्चिद्दीर्घः खड्गः ; करे शूलम् । हृदये च स्त्रीस्वभावसुलभं यद्भयं तन्निलीनं वर्तताम् । बाहिः भीषणं साङ्ग्रामिकाकारं बिभृयाव यथा बहवः पुरुषाकारा भीरवः बिभ्रति बाह्यवेषेण तत्त्वं छादयन्तः ।

सिलिआ— कं त्वां आह्वयानि यदा त्वं पुरुषो भवसि ?

रोसलिन्द्— *जोव्-अस्य यः किङ्करः तन्नाम्नोऽवरं नाम मा मे भूत् । तस्मात् पश्य 'गनिमीड्' इति मां आह्वय । अथ किमभिधानं ते भविष्यति ।

सिलिआ— किमपि यत् मम 'स्थिति'† संस्पर्शि भवेत् । नेतः परमहं सिलिआ । अपि तु अलिएना (असम्बन्धा) ।

रोसलिन्द्— अथ पितृव्यपुत्रि, किं भवेत् यद्यावां तव पितुरास्थानात् तं विकटमाषिणं जडमपहरेव ? स खलु अस्मत्प्रयाणे आश्वासहेतुर्भवेत् ।

सिलिआ— कृत्स्नं जगत् स मया सह अटेत् । मुञ्च मामेकाकिनीं तमनुकूलयितुम् । अपगच्छेव । आवयोरामरणानि सम्पदं च सह गृहाण । चिन्तय उचिततमं कालं क्षेमतमं मार्गं च, येन मम निष्क्रमणानन्तरं करिष्यमाणादन्वेषणात् रक्षिते स्याव । अद्य सन्तुष्टे स्वातन्त्र्यं लब्धुं आशां गच्छावः । न विप्रवासाय । [निष्क्रान्ते]

इति प्रथमोऽङ्कः ।

---

* Jove - Jupiter † State - स्वायत्तं राज्यमित्यर्थः ।

# पूर्णत्वसंवादः ॥

(Madhuranthakam T. E. Veeraraghavacharya Siromani)

समाप्य वर्तमानतां तदेकवृत्तितात्मिकां
प्रसाधयन्ति तां हरेः परे स्वयं क्षिपन्ति च ।
विकल्पयन्ति च क्वचित् निरस्य हास्यतन्मतं
समर्थ्यते समस्तवस्तुपूर्णताऽत्र वैष्णवी ॥

एकः—सखे ! 'तदितरावृत्तित्वे सति तदेकवृत्तित्वं परिसमाप्य वर्तमानत्वम्' इति स्वसंप्रदायग्रन्थे (85 पु.) लिखन्त एव 'वस्तुतः एकत्रैव विद्यमानत्वं नाभ्युपगम्यते किल' इति संप्रदायपरित्राणे (18 पु.) स्वयमेव लिखन्ति परे । स्वरूपसमाप्तिस्तर्हि स्वरूपसमाप्तिः किल स्वयं संपादिता भवति ?

अन्यः— 'सर्वशक्ति'भूमिकायां उद्घाटितैव मया परोक्तिव्याहतिरियम् । 'मद्यपानमेव वयं प्रतिषेधामः, सुरापानन्तु काममनुमन्यामहे' इतिवद्व्याहतभाषणं खल्वेतत् इति । तदिदमनूद्य वैदिकमनोहरायां [सर्वजित्-कुम्भमासे] लिखन्ति— स्वरूपसमाप्तिं ये वदन्ति ते एकत्रैव विद्यमानत्वं दूषयितुं भूषयितुञ्च कामं प्रभवन्ति । एकत्रैव स्वरूपसमाप्तिः कटाक्षेणेन एकत्रैव विद्यमानतां आचक्षते । अन्यत्रापि स्वरूपसत्तायाः कटाक्षेणेन तद्विपर्ययमाचक्षते च इति । 'एकत्रैवेत्येवकारव्यवच्छेद्यं वस्त्वन्तरे विद्यमानत्वमेव' इति च ।

एकः— भगवत्स्वरूपं घटेऽस्ति, नास्ति पटादौ इति स्वरूपसमाप्तिवादः । पटादावपि स्वरूपस्य सत्त्वात् स्वरूपसमाप्तिवादोऽयं दूष्यते इति मनोहरोक्तिसारः । इदमेव च परेषां संप्रदायपरित्राणसर्वस्वम् । नन्वयं साक्षादस्मत्सिद्धान्त एव । नियमविकल्पाभ्यां स्वरूपसमाप्तिः परैरेव समापिताऽऽसीत् ।

अन्यः— 'अन्तर्गृहे कृष्णमवेक्ष्य चोरं बद्ध्वा कवाटं जननी गतैका । उलू-

खले दामनि बद्धमेनं तत्रापि दृष्ट्वा विस्मिता बभूव ॥' इति पद्यं स्वरूपसमाप्तौ प्रमाणयन्ति मनोहरायाम् । एवं नृसिंहावतारविषयं 'स्तम्भैकवर्जमधुनापि' इत्यादिकमन्यत्र । हन्त स्वरूपविग्रहयोर्मिथो भेदमप्यजानाना इमे कथानधिकारिणः कथककञ्चुकच्छन्नाः स्वसिद्धान्तमपि व्याकुलयन्ति। कृष्णरूपाणि (विग्रहाः) असङ्ख्यानि । एकेन रूपेणैकत्रैव सत्त्वम् । रूपान्तरेण त्वन्यत्र । नैवं स्वरूपे सुवचम् । तद्धि एकमेव एकत्रैव सत् अन्यत्र कथं स्यात् ।

एकः— वयस्य,— 'अन्यत्रापि विद्यमानं कथमेकत्रैव विद्यमानं कथ्यताम्' इति कथयन्तो मितमतयः सर्वशक्तिकारोदाहृतां न्यायमञ्जर्यां जयन्तभट्टोक्तिं पुनः पुनरावर्त्तयन्तः कालं क्षिपन्तु । सा चेयम्— 'प्रतिपिण्डं कार्त्स्न्येनैव जातिर्वर्त्तते। पिण्डान्तरेऽपि तदुपलम्भोऽस्त्येव। एकदेशास्तु जातेर्न सन्त्येव यैरस्याः वर्तनं भ्रमः'— इति लिखन्ति मनोहरायाम् ।

अन्यः—पुनःपुनरिमां जयन्तभट्टोक्तिमावर्तयन्त एव कालं क्षिपामः । एकत्रैवविद्यमानत्वरूपस्वरूपसमाप्तिर्जातेः साक्षादेवात्र निषिध्यते । प्रतिपिण्डं जातिर्वर्त्तत इति ह्युक्तमिह । न तु एकत्रैव वर्तत इति। एकत्रैव विद्यमानत्वं जातिबाधकमित्येव जातिवादिनां राद्धान्तः । 'व्यक्तेरभेदस्तुल्यत्वम्........जातिबाधकसंग्रहः।' इति न्यायकिरणावल्यामुदयनाचार्याः । 'व्यक्तेरभेदः'-एकत्रैव विद्यमानत्वं इति व्याचख्युः। आकाशत्वादेरेकत्रैव वर्तमानत्वात् न जातित्वम् 'अनेकानुगतं सामान्यम्' न त्वेकत्रैव विद्यमानम् । न हि द्रव्यत्वं घट एवैकस्मिन् वर्तते, न तु घटान्तरे पटादौ चेति जातिवादिनो वदन्ति ।

एकः— दीपादिग्रन्थोदाहृतजातिदृष्टान्तबलादपि भगवतः स्वरूपसमाप्तिः एकत्रैव विद्यमानत्वरूपा न स्मर्तव्याऽभीत् परेषाम् । यथा जातिः एकत्रैव न वर्तते; एकत्रैव सत्त्वस्य जातित्वे बाधकत्वात् । तथा भगवत्स्वरूपमपि । अनेकानुगतत्वं हि जातेः स्वरूपस्य च । एकत्रैव सत्त्वे जाते-

रिव स्वरूपस्यापि इदं व्याहन्येत ।

अन्यः— एवमेतत् । परेतु स्वसंप्रदायतत्त्वमपि यथावन्न जानन्ति । कुतः पुनर्नैयायिकादिमतं जातितत्त्वम् । तथा हि । भगवतः स्वरूपं प्रतिवस्तु निश्शेषं व्याप्नोति इति स्वीकरणे का नाम विपत्तिरागता ? परम-कृपया शान्त्या च समादधत इति प्रविनयमिव प्रार्थनां प्रकाशयन्ति अद्भुतशक्तौ [२ अ.] स्वस्वरूपैकदेशे स्वेतरसकलपदार्थधारणं इति श्रीकृष्णपादानां परन्दरहस्ये मूलमन्त्रप्रकरणे व्याप्तिस्वरूपशिक्षणस्य विपत्तिः प्रथमा । तत्रोदाहृतानां मेरोरिवाणुः 'यस्यायुतायुतांशांशे विश्व-शक्तिरियं स्थिता' इत्यादीनां एकदेशेन व्याप्तिसाधकानां प्रमाणानां विप-त्तिर्द्वितीया । 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इति अंशत एवान्तर्व्याप्तिग्राहकगीतायाः तृतीया । स्वस्य वेदार्थसंग्रहतद्व्याख्याद्यनु-सारित्वाभिमानित्वस्य चतुर्थी । 'जगत् ममायुतायुतांशांशेनात्मतया प्रविश्य' इति विष्टभ्येति गीतावचनं वेदार्थसंग्रहे व्याख्यातम् । 'अंश-शब्दः स्वरूपैकदेशपरः' इति तत्र तात्पर्यदीपिका ।

एकः— प्रतिव्यक्ति समाप्यात्मतया व्याप्यधारणमन्तर्व्याप्तिः इति मूलमन्त्र-प्रकरणे पूर्वमुदाहृते श्रीकृष्णपादाः । अंशांशेनात्मतया प्रविश्य धारणम-न्तर्व्याप्तिः इति वेदार्थसंग्रहे तात्पर्यदीपिकायां च श्रीभाष्यकाराः व्यासार्याश्च । अद्भुतशक्तौ परे एकदेशव्याप्तिं महता संरम्भेण दूष-यन्ति । गीतादिकमुदाहृतप्रमाणजातं वेदार्थसंग्रहादिपूर्वाचार्यसूक्तीश्च बहुशः प्रतिबोधिता अपि तत्रादर्शनमिवाभिनयन्ति । अन्तर्व्याप्तिविषये स्वरूपसमाप्तेरुदाहृतायाः, गीतावेदार्थसंग्रहादिभिः विरोधः सर्वशक्ति-भूमिकायां बहुधा प्रपञ्चितो भवता । तत्रैकमप्युद्धर्तुमक्षमतैव स्वकीया-द्भुतशक्त्या ऽऽविष्कृता भवति । [व्याप्तिविषये वक्तव्यांशास्समनन्तरसञ्चि-कायामपि प्रकाशयिष्यन्ते ।]

---

# नाटककथासारः ॥

(शाकुन्तलम्)

(T. Venkatacharya B. O. L.)

पुरुवंशसमुद्भवः दुष्यन्तो नाम राजा महीं परिपालयन् आस्त । स कदाचित् मृगयां इच्छन् रथमारुह्य वनं प्रतस्थे । तत्र हरिणमेकं हन्तुकामः शरं सन्धाय अनुद्रुतवान् । यावत् सः शरं तदुपरि विमोक्तुं सज्जो बभूव तावदेव तपस्विनः केचित् तं व्यवधाय अन्तरे समुपस्थिताः । 'आश्रममृगोऽयं न हन्तव्यः' इति च दुष्यन्तं प्रार्थयाञ्चक्रिरे । राजा तेषां अभ्यर्थनमङ्गीकृत्य कृपामृदुमनाः सन् बाणं प्रतिसञ्जहार । तदनु, आश्रममेत्य अतिथिसत्कारं प्रतिग्रहीतुं तैः कण्वशिष्यैः अभ्यर्थितः दुष्यन्तः तं कण्वाश्रमं ययौ । तत्र कण्वमहर्षिः नावर्तत । आगतान् अतिथीन् सम्भावयितुं शकुन्तलां नियुज्य किमपि कार्यं निमित्तीकृत्य सोमतीर्थं गतः आसीत् ।

विनीतवेषेण आश्रमं प्रविशति राज्ञि शकुन्तला सह सखीभ्यां बालपादपेभ्यः जलं सिञ्चन्ती समदृश्यत । तदीयेन अमानुषरूपलावण्येन आकृष्टान्तरङ्गस्य राज्ञः शकुन्तलायां अतिशयितः अनुरागः अभूत् । आश्रमवृक्षकान् जलेन सिञ्चन्तीनां तासां तरसरुचां मधुरं आलापं सकुतूहलं विटपान्तरितः सः शुश्राव । तदा पुनः पुनः निवारितोऽपि दुर्विनीतः कश्चित् मधुकरः शकुन्तलां तन्मुखं अभिपतन् अबाधत । तां बाधां सोढुं अशक्ता भयाक्रान्ता सा स्वपरित्राणार्थं सख्यौ अनसूयां प्रियंवदां च आह्वयत । ते तु 'के आवां परित्रातुं, दुष्यन्तम् आक्रन्द, राजरक्षितानि तपोवनानि नाम' इति सपरिहासं अवोचताम् । राजा अमुं अवकाशं अवलम्ब्य रक्षणार्थं आगत इव तासां पुरस्तात् आत्मानं अदर्शयत् । ताभिः सह किञ्चित्कालं संलापः अवसरमलभत । तदा दुष्यन्तः तस्यामिव शकुन्तलापि

तस्मिन् नितान्तमनुरक्ता समजनि । सखीभ्यां प्रार्थितो राजा नातिस्पष्टं आत्मानं प्रकटयाञ्चक्रे । शकुन्तला कस्य दुहिता इति अवगन्तुकामो दुष्यन्तः तद्वृत्तान्तं सख्यौ पप्रच्छ । सा विश्वामित्रस्य मेनकायाश्च दुहितेति, वने विसृष्टां तां कण्वमहार्षिः वर्धयामास इति च ते न्यवेदयताम् । तस्याः स्वपरिणययोग्यतां जिज्ञासमानस्य राज्ञः 'सा क्षत्रपरिग्रहक्षमा' इति निर्णयः उदभूत् । एवं परस्परं आलापं प्रवर्तयतां तेषां कश्चिद्वन्यो द्विपः तात्कालिकं विप्रयोगं सम्पादयाञ्चक्रे । निरतिशयप्रेमनिबद्धान्तरङ्गौ शकुन्तलादुष्यन्तौ पुनस्समागमकाङ्क्षिणौ स्वस्वस्थानं बलादनिच्छन्तावपि अगच्छताम् ।

## II

मृगयार्थं प्रस्थितेन राज्ञा सह तस्य सखा माढव्योऽपि वनं इयाय । कण्वाश्रमं प्रति तु स नागच्छत् । दुष्यन्त एक एव तत्र जगाम । गजवृत्तान्तेन आश्रमात् विप्रकृष्टस्य राज्ञः परेद्युरपि मृगयायां प्रवृत्तिरासीत् । मृगयासक्तो राजा मध्याह्ने जातेऽपि ततो न विरराम । तेन मृगयाविरक्तस्य माढव्यस्य महान् क्लेशो बभूव । अनियतवेलं आहारः अगृह्यत । पत्रसङ्करेण कषायं गिरिनदीजलं पातव्यं आपतितम् । पूर्वेद्युः तुरगानुधावनात् माढव्यस्य गात्रं सर्वं प्रशिथिलं अभूत् । अतः रात्रौ निद्राऽपि नाभवत् । एभिः कारणैः क्लेशं अनुभूतवतः दुष्यन्तसखस्य 'मृगयां परित्यज्य कदा वा नगरं गम्येत' इति महती चिन्ता समजनि । एवं चिन्तयति तस्मिन् भाग्यवशात् राजा तत्र एव अभ्यागच्छत् । तदा माढव्यः चलितुमपि अशक्त इव नाटयामास । दण्डकाष्ठं अवलम्ब्य अङ्गभङ्गविकल इव भूत्वा 'भो वयस्य, न मे हस्तपादं प्रसरति, वाङ्मात्रेण विजयी भव' इत्याशशंसे । तेन मृगयायां माढव्यस्य वैमुख्यं राज्ञा अवगतम् । शकुन्तलां अनुस्मृत्य तस्यापि चेतः मृगयाविक्लवमासीत् । अनतिक्रमणीयं सुहृद्वचनमिति व्यपदिश्य मृगयासंरम्भं अपनेतुं स सेनापतिं न्ययुङ्क्त । शान्ते मृगयासंरम्भे

राजा शकुन्तलाविषयकमेव आलापं माढव्यस्य सकाशे प्रावर्तयत । 'न केवलं मम तस्यां अभिलाषः । किं तु तस्या अपि मयि अनुराग: अस्त्येव । यतः सा पूर्वं मत्सकाशात् आश्रमं प्रति गमनसमये विनापि कारणं मामेव 'द्रष्टुकामा' दर्भाङ्कुरेण चरणः क्षत इति तदुद्धरणव्याजेन तस्थौ । शाखासु असक्तमपि वल्कलं विमोचयन्तीव निवृत्तवदना मामपश्यत्' इति स्वाभिप्रायं दुष्यन्तः आविश्चकार । तेन शकुन्तलायां राज्ञः प्रीत्यतिशयं सः अवागच्छत् । 'सोऽयं पिण्डखर्जूरैः उद्वेजितस्य तिन्त्रिण्यां अभिलाष:, यत् लोकोत्तरस्त्रीभाजः भवतोऽपि तापसकन्यकायां प्रार्थना' इति सोपहासं दुष्यन्तमवादीत् । राजा तु 'नेयं तापसकन्यका, अपि तु दुर्लभं स्त्रीरत्नम्' इति श्लाघां वितेने ।

तां विलोकयितुं केन अपदेशेन आश्रमं प्रति गन्तुं युक्तमिति पृच्छति दुष्यन्ते, माढव्यः नीवारभागग्रहणं व्याजं कर्तुमुपदिदेश । एवमुपायं चिन्तयति तस्मिन् द्वौ ऋषिकुमारकौ तत्समीपमुपागतौ । 'कण्वो महर्षिः आश्रमे न सन्निधत्ते । तपस्विनः यजन्ते । रक्षांसि यागस्य विघ्नमुत्पादयन्ति । तेन तद्रक्षणार्थं कतिपयरात्रं तत्र सन्निधातुं आश्रमवासिनः भवन्तं अर्थयन्ते' इति तौ कुमारकौ अवदताम् । इयमभ्यर्थना अन्धन-मन्विष्यतः निधिलाभ इवासीत् । अतस्तामङ्गीचकार ।

तदनन्तरं राज्ञो मातुः सकाशात् लेखहारकः करभकः उपययौ । 'आगामिनि चतुर्थे दिवसे मम उपवासो भविष्यति । तदा त्वया सन्निधातव्यम्' इति मातुरादेशं स न्यवेदयत् । एकतः तपस्विकार्यम् । अन्यतः गुरुजनाज्ञा । द्वयमप्यनतिक्रमणीयम् । अतः किमत्र कर्तव्यम् इति अजानन् दुष्यन्तः दोलायमानमनाः बभूव । ततः 'माढव्यः अम्बाभिः पुत्र इति परिगृहीतः' इति स्मृत्वा मातुः पुत्रकृत्यं अनुष्ठातुं तं नगरं प्राहिणोत् । तपोवनोपरोधं परिहर्तुं सर्वान् अनुयायिनोऽपि तेन सहैव प्रास्थापयत् । चपलो माढव्यः अन्तःपुरे कदाचित् स्वस्य अनिष्टं उत्पादयेत् इति भिया 'शकुन्तलां अधिकृत्य कथितं सर्वमपि परिहासविजल्पितम्' इति महार्थगौर-

वादेव आश्रमं प्रति गम्यते इति च तत्सकाशे गूढं अभिधाय तं प्रैषयत्। स्वयं चतपालिकार्यं कर्तुं कतिचित् दिनानि आश्रमे न्यवसत् ।

## III

आतपः उग्र आसीत् । मालिनीनदीतीरे कचिल्लतामण्टपे शकुन्तला सह सखीभ्यां अवर्तत । आश्रमे निवसन् दुष्यन्तः कदाचित् मनोभवेन पीडितः सन् शकुन्तलां द्रष्टुं आश्रमात्प्रतस्थे । लताकुञ्जनिगूढः निभृतं तां अवालोकत । तासां विस्रम्भकथितान्यपि शुश्राव । तत्सख्योः संवादसमये मदनदोषादेव शकुन्तला बलवदस्वस्था इति वार्तां सखीमुखादाकर्णयत् । ताभ्यां सनिर्बन्धं पृष्टा कण्वदुहिता राजदर्शनात्प्रभृति इयं आत्मनः अवस्था इत्यब्रवीत् । येन केनापि प्रकारेण तत्प्राप्तये यतनीयं इति सा प्रार्थयाञ्चक्रे । सख्यौ च अनुरूप एव पौरवे अभिलाषः इति अभिनन्दनमकुरुताम् । मदनलेखं कुसुमेषु निगुह्य राज्ञे दातुं निश्चित्य तत्करणार्थं शकुन्तलां न्ययुञ्जाताम् । सख्योः नियोगमनुसृत्य चिन्तितं गीतं ताभ्यां श्रावयामास । 'दुष्यन्तहेतुकः अनङ्गसन्तापः सोढुमशक्यः' इत्यर्थः गीतात् प्रतीतः । इदं सर्वं निलीय शृण्वन् दुष्यन्तः सहसा तासां पुरस्तादाजगाम । तेन सख्यौ हर्षपरवशे अभूताम् । शकुन्तलां परिणयेन अनुग्रहीतुं तं प्रार्थयताम् । राजानो बहुवल्लभाः । अतः स्वनगरगमनानन्तरं राजा कदाचित् शकुन्तलां विस्मरेदिति सन्दिह्य 'यथा नौ प्रियसखी बन्धुजनशोचनीया न भवति तथा निर्वहणीयम्' इति स्वमनोरथं ते आवेदयताम् । दुष्यन्तोऽपि ताभ्यां प्रार्थितं शपथपुरस्सरं अङ्गीचकार । तदनु शकुन्तलायाः दुष्यन्तस्य च किञ्चित्कालं निश्शङ्कं निस्सङ्कोचं च परस्परं संलापादिकं निर्वर्तयितुं अवसरदानाय किमपि व्याजीकृत्य अनसूयाप्रियंवदे ततो निष्क्रान्ते । अथापि, शकुन्तलां गुरुजनात् बिभ्यतीं विदित्वा दुष्यन्तः 'गान्धर्वविवाहः शास्त्रसंमतः' इति सनिदर्शनमुक्त्वा तेन विधिना तां परिजग्राह । एवं तयोः रममाणयोः सतोः शकुन्तलायाः शरीरवृत्तान्तमुपलब्धुं गौतमीमागच्छन्तीं

सखी सूचयामास । अनेनोपरोधेन सखेदं दुष्यन्तमामन्त्र्य प्रस्थिता शकुन्तला सह गौतम्या उटजं ययौ । ततो लतामण्टपात् निर्गन्तुमशक्तः खिन्नो राजा तच्चिन्ताविष्ट आसीत् । तदा राक्षसेभ्यः यज्ञरक्षणार्थं मुनिभिराहूतः बलात्तस्मात् प्रदेशात् निर्जगाम ।

# विद्वत्सु विज्ञापनम् ॥

अद्यतनी लोकस्थितिरार्तघोरेति, तस्याः प्रतीकारः विद्वत्स्वेवायतत इति च पूर्वस्यां सञ्चिकायां किञ्चिदभ्यधाम । तत्र विशिष्य विदुषामवधानं सम्पादयितुकामा इदानीं पुनरपि किञ्चिदभिधातुमिच्छामः ।

येनकेनापि कारणेन जातं औदासीन्यं सद्यः परित्यक्तव्यम् । अस्माकं लोकवृत्तस्य च नास्ति कश्चन सम्बन्ध इति मतिः यावद्विदुषामनुवर्तेत तावल्लोकस्य न क्षेमो भविष्यतीति शक्यं दृढं प्रतिज्ञातुम् । लोको जानातु मा वा विद्वांसो लोकस्य स्वामिनः, शासितारः, रक्षितारः, नेतारः, सर्वे भवन्ति । अयमात्मनो धर्मः, अधिकारः, सर्वैर्विद्वद्भिः सम्यगवगन्तव्यः । प्रथमं के वयम् ? कथं जीवामः ? किमर्थं जीवामः ? अस्मिन् शरीरे शीर्णे किं भविष्यति ? इति चिन्तायां मनः प्रवर्तनीयम् । इयं चिन्ता क्रियमाणा नूनं अस्माकं सर्वमौदासीन्यं निवर्तयेत् । कर्तव्येषु विवेकसम्पत्तिं त्वराञ्च प्रदिशेत् ।

केचिदस्मान् निन्दन्ति । द्विषन्ति । परिहसन्ति । उपद्रवन्ति । बाधन्ते । कस्मात् ? अज्ञानात् । जानन्तः के एवं कुर्युः ? तस्मादेषु अनुकम्पा अस्माभिः कार्या, न प्रतिनिन्दादिकम् । यथा तेषां समीचीनमार्गाश्रयणहेतुः तत्त्वबोधो जायेत तथा अस्माभिः वाचा, कर्मणा, मनसा आचरितव्यम् । सत्यं अतिकष्टमेतत्, यदीदृशी परमा शान्तिः लोकहितप्रवणता च केषाञ्चित् सम्पद्यत इति । अथापि किं क्रियताम् ? लोकक्षेमस्य अस्मत्क्षेमस्य चानन्यथासिद्धं एकं कारणमेतत् यदेवंविधा महान्तस्तत्र तत्र सन्तीति । अतः

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥

इति भगवदुपदेशरीत्या परमः प्रयत्नः कार्यः । एकैकेनापि विदुषा मद्य इदं कार्यमिति सविनयं सनिर्भरं विज्ञापयामः—

1 सन्ध्यावन्दनादिकर्मानुष्ठानसमये तत्तन्मन्त्रार्थभावनेन भगवत्स्मरणाभ्यासः, मनसः शान्तिः प्रसादः कल्याणप्रवणतेति सकलगुणातिशयफलः कर्तव्यः ।

2 भगवन्तमाराध्य श्रीमद्रामायणपारायणं कृत्वा च 'लोकाः समस्ताः सुखिनो भवन्तु' इति प्रार्थनं प्रत्यहं भगवद्भक्तिभूतानुकम्पाभ्यामतिभरितेन मनसा कर्तव्यम् ।

3 स्वस्वस्थाने पुराणप्रवचनं वा भगवत्कथाकालक्षेपो वा यथा मुहुः प्रवर्तेत तथा स्वस्वसुहृद्भिः साकं समालोच्य संविधातव्यम् ।

4 कलाशालागामिनां बालानां स्तोत्रपाठशिक्षायै आचारेषु श्रद्धासम्पत्त्यै च यदौपयिकं तत् कर्तव्यम् ।

दिक्प्रदर्शनरीत्या इदं किञ्चिदवोचाम । स्वस्वबुद्ध्या तत्तत्स्थलसुलभसौकर्यादिपर्यालोचनया च यथायुक्तं भाति तत्तद्विद्वांसः कर्तुमर्हन्ति ।

---

# विद्वान् महाराजः ॥

अस्मद्देशे नास्ति कश्चन पण्डितः यः गोश्रीराज्यराजवंशालङ्कारं विदुषामग्रगण्यं गुणनिधिं परीक्षितं महाराजं न जानाति । स इदानीं तस्य राज्यस्य साक्षात् 'महाराज' पदं प्राप्त इति परमो नः प्रहर्षः । अखण्डे भूमण्डले नान्यस्य राज्यस्य ईदृशं भाग्यमस्ति यत् शास्त्रेषु परमकुशलो महाराजो भवतीति । केरलानां तत्रापि गोश्रीराज्यस्य इदमसाधारणं भाग्यम् । अद्य राज्यशासनभरं स्वीकृतवतोऽस्य विदुषो महाराजस्य दीर्घमायुः आरोग्यं विद्याप्रचारसौकर्यसम्पत्त्यतिशयं च परस्मिन् ब्रह्मणि भगवति श्रीनिवासे प्रार्थयामहे । [सं]

## श्री गोश्रीमहाराजाः ॥

(D. Damodara Pisharadi.)

विदितमेवेदं समेषां यत् कुत्रचिदेव कदाचिदेव कस्माच्चिदेव सुकृतपरिपाकात्स्वावतारेण पुनन्ति वसुन्धरां महात्मानः इति । आवैदिककालं परश्शतब्रह्मर्षीणां राजर्षीणां च जननीभूयमवलम्बमाना भारताम्बा मोदते । विशेषतश्च आर्षभूमिपादायमानेयं केरलक्षोणिः श्रीशङ्करप्रभाकराचार्यादीन् शास्त्रशाणसमुत्तेजितधिषणान् प्रातःस्मरणीयान् प्रभावयन्ती देदीप्यत इत्यहो धन्यतमा वयम् ।

इदानीमपि सेयं श्रीगोश्रीमहाराजपदमधितिष्ठतः परीक्षिन्नाम्ना वासितयशसो द्वेधा पण्डितराजान् अङ्के समुद्वहन्ती पुत्रलालनसुखमनुभवति । ओट्टूर् (Otoor) इति प्रसिद्धकेरलब्राह्मगोत्रमात् मङ्कु (Manku) इति सुगृहीतनामधेयायां राज्ञ्यां विदुषीमणौ पुत्रतां प्रापन्नेते सुगृहीतनामानः । पञ्चषवयसामप्येतेषां धिषणापाटवं विद्यातृष्णाञ्चावलोक्य मोदमाना राजर्षीति दिगन्तप्रथिता महाराजा एतेषां अध्यापने स्वयं जागरूका अवर्तिषत । तन्निकट एव न्यायशास्त्रे प्रकरणपर्यन्तमेकान्तमनसास्त्रिचतुरैः सब्रह्मचारिभिः साकमधिजगिरे । गदाधरीय दिद्व्युत्पादकन्यायग्रन्थाध्यापनार्थमेषामानाय्यन्त दिगन्तविश्रान्तप्रथाः श्री शठकोपाचार्याः । शाब्दिकतिलकादिबिरुदालङ्कृताः श्री अय्याशास्त्रिणः, सहृदयतिलकाः के. रामपिषारकाः अन्ये च बहवः पण्डितकवितल्लजाः एतेषां महाराजानां सहपाठिन उत्तमसुहृदश्च ।

विद्याव्यसनिनो ह्येते कालानुरूपं पाश्चात्यमपि संस्कारमधिजिगांसमानाः आङ्गल्यां प्रायतन्त ; उत्तीर्णाश्च प्रशस्तं बि. ए., [B. A.,] परीक्षाम् । पुनरपि वेदान्तसाहित्यादिषु नानाविधेषु शास्त्रेषु परिचयं लिप्सवः तेष्वेवैकमनसोऽवर्तन्त । अद्यावधि प्राधान्येनन्याये, साहित्यं, कदाचिच्चाद्वैतवेदान्तेषु नवीनान् ग्रन्थान् पाठयन्तोऽन्तेवासिनः पावयन्ति ।

न केवलं देशिकतां मातुलतामप्यावहन्तो राजर्षिमहाराजाः अदसीयान् विनयार्द्रान् अभिवीक्ष्य प्रीतमनसो विद्यामिव माधवीनाम्नीं स्वपुत्रीमप्येभ्यो ददुः । भारतीयानि प्रधानानि नगराणि पावनानि तीर्थानि चासकृत् पर्यटन्तस्तत्रत्यानां शास्त्रपण्डितानां असाधारणप्रीतिपात्रमशोभन्त ।

अत्रत्यां संस्कृतकलाशालां औरसीमिव लालयन्ति । उपपञ्चाविंशाधिकवत्सरान् राजकीयशास्त्रसदसि अग्रासनाधिपत्यमुद्वहन्तो नानादेशागतान् पण्डितान् प्रीणयन्ति । एकदा शास्त्रालापेन, अन्यदा काव्यनिर्माणेन, कदाचित् अध्यापनेन च सर्वदा विद्याजागरूका एतत्कल्पा भूपालाः अतिविरला एव ।

काश्यधिवासिनः श्रीबोल्पाकर् नम्पूतिरिप्पाट्-महाशयेभ्यः प्रभृति भदन्ता शिष्यपरम्परा तत एव सारामृतमुद्वहन्ती प्रवहत्याविच्छिन्ना । दिनकरीयादिव्युत्पादकशास्त्रव्याख्यानानि शाकुन्तलादिकाव्यविवरणानि चैतेषां प्रतिभायाश्शाणायन्ते ।

मन्ये दीनां दशामनुप्राप्ता सुरभारत्येतदीयकटाक्षसुधयोज्जीविता भवेत् ।

---

# पुस्तकपरामर्शः ॥

वेदान्तरक्षामणिविमर्शः । श्री ए. वि. गोपालाचार्यविरचितः ।

सार्वभौमप्रज्ञैश्शमादिशुभगुणशेवधिभिर्मतत्रयपाण्डित्यप्रवरैः त्रिशिरःपुरवास्तव्यैः श्री उ. वे. ए. वि. गोपालाचार्यमहाशयैर्विरचितं वेदान्तरक्षामणिविमर्शभागमानन्दमयाधिकरणगोचरमनुवाचयन्तो नूनं परग्रन्थवैमुख्यम्, अस्यैव ग्रन्थस्यासकृदावर्तनेऽभिरुचिञ्च वहन्तो विलसन्तीति प्रत्यक्षमेतत् । भगवत्पादानुयायिग्रन्थरत्नत एव 'पुच्छब्रह्मपक्षस्य पूर्वोक्तदूषणगणेन हेयत्वादेव नास्मिन् सर्वाणि सूत्राणि योजितानि', 'अत्रैवं सुमार्गेणाधि-

करणे निर्व्यूढे किमर्थं (पुच्छब्रह्म) भाष्यमकालकुसुमन्यायेन प्रवर्तेत' इत्यादीनि वाक्यान्यनूद्य शाङ्करोपनिषद्भाष्यादि च प्रदर्श्य आनन्दमयस्य ब्रह्मतां तन्मतसंमतामेव समर्थयमानानां, मयटः प्राचुर्यार्थपक्षे ब्रह्मण्यानन्दमये दुःखलेशस्यापि प्रसञ्जनं काव्यनाटकालङ्कारशाङ्करग्रन्थस्मृतिपुराणाद्यनेकप्रयोगप्रदर्शनेन बहुमुखं प्रतिक्षिपतामेषां सर्वतोमुखं वैदुष्यं सर्वग्रन्थधारणसामर्थ्यं च को नाम न श्लाघेत ।

आनन्दवल्लीरसानुभवमात्रेणानुपरम्य 'आमूलाग्रं तैत्तिरीयोपनिषत्प्रदर्शितरसान् अनुबुभूषामः । तदनुभवानन्तरमुभयपक्षरीत्या सूत्राक्षरस्वारस्यास्वारस्ये संग्रहेण विचारयिष्यामः । तदनन्तरं प्रश्नोत्तरसाहस्री-रक्षामण्यादिग्रन्थेष्वस्मत्सुहृदुक्तान्यनूद्य प्रतिवदिष्यामः । परमहंसपरिव्राजकाचार्याणां श्रीतिरुप्पतिस्वामिनां (श्रीकोलियालंस्वामिनां श्रीरङ्गरामानुजमहादेशिकानाम्) आनन्दमयाधिकरणविचारात्मकग्रन्थस्य सुप्रतिष्ठितताञ्च विशदीकरिष्यामः' इति प्रतिज्ञाय वेदान्तरक्षामणिविमर्शव्याजेन सर्वमतस्थैरप्यभिनवमनुभाव्यान् अनन्तान् रसान् आविष्कृत्य नूनमिमे 'रसो वै सः' इत्यादिश्रुतिवाक्यजातं स्वकीयानन्दमयग्रन्थविषय एव समन्वितं कुर्वन्तीव । 'ब्रह्मविदाप्नोति परम्' इति श्रुतिर्जीवपरभेदमेव व्यनक्तीति भगवत्पादवचनमुखेनैव निरणैषुरिमे । सत्यं ज्ञानमिति ऋचा च तदर्थस्तथैव विशदीकृतोऽस्ति । सर्वविद्यासाधारणसत्यत्वादिगुणविशिष्टस्य च ब्रह्मणः प्रकृतविद्याविशेषगुणमानन्दमयत्वमुपदेष्टुं 'तस्माद्वा एतस्मा' दिति प्रक्रम्य आनन्दमयस्य शारीरात्मनो विद्यां विधाय 'अथातोऽनु प्रश्ना' इति विद्याफलविचारं प्रस्तुत्य उपास्यमानस्य ब्रह्मानन्दस्य अपरिच्छिन्नतां दर्शयितुं तस्य सर्वजगत्कारणतां प्रतिपाद्य आनन्दमीमांसया तदानन्दं तत्क्रतुन्यायसिद्धं मुक्तौ तदुपासकानन्दस्यापरिच्छिन्नमाविद्य 'न बिभेति कुतश्चन' इत्यादिभिर्वाक्यैः उपासकेऽप्यानन्दप्राचुर्यमिदं दुःखलेशं न सहत इति निरूपयन्तीयमानन्दवल्ली आनन्दमयमेव प्रतिपाद्यमुख्यार्थमाकलयतीत्यत्र कस्सन्देहः ? तदिदं शिक्षावल्लीमारभ्यैव संशोध्य

51

सम्यगुपन्यस्तमानन्दमयैकतानत्वं तैत्तिरीयोपनिषद इह विमर्शग्रन्थे । एवं सर्वदैव भगवद्गुणानुभवरसानुभावसंफुल्लमानसा इमे सरलमधुरैः सर्वमतसारप्रदर्शिभिर्बहुग्रन्थसंवादसंपादितसर्वांशप्रामाण्यैः वेदान्तानुबन्धिभिर्विविधैः प्रबन्धरत्नैः सहृदयास्तिकसार्थप्रीणनेन भगवद्रामानुजसिद्धान्तं सर्वतः प्रचारयन्त्विति सप्रश्रयं प्रार्थयामहे । ति. वीरराघवाचार्यः

[अस्य ग्रन्थस्य विमर्शे नियुक्ताः केचित् विमर्शकपदात् प्रच्युताः साक्षात् प्रतिपक्षिपदमाश्रयन्तः किमपि किमपि 'हिन्दु' पत्रिकायामलिखन् । पुच्छब्रह्मवादे आनन्दमयाधिकरणसूत्राणि अतिक्लिष्टगत्या योजनीयानि भवन्तीति भामतीकारप्रभृति घण्टाघुष्टमिदम् । किं तत्र अस्वारस्यमिति पृच्छन्तः नूनं शास्त्रव्याख्यानमार्गेषु समीचीनस्य परिचयस्य अद्यापि सम्पाद्यत्वावस्थां प्रकाशयन्ति ।] [ सं ]

# नारायणः ॥

पायात् पितामहमहेश्वरवन्दितो मां
नारायणः सकलशोकहरोऽनवद्यः ।
यं सूरयो नवसुधामधुरैर्वचोभिः
नित्यं स्तुवन्ति बहुधा परिकीर्तयन्ति ॥

विश्वैकवीर जगदीश्वर दानवारे
सृष्टिस्थितिप्रलयकारणभूत शौरे ।
त्रायस्व मामनिशमव्यय दीनदीनं
त्वत्पादपङ्कजपुटे भ्रमरायमाणम् ॥

तोण्डमले नारायणभट्टः

---

निर्दाक्षिण्या व्यथयति वधूर्नाम घोरा पिशाची
पुत्रस्तस्या वशमुपगतः सर्वथा भिन्नवृत्तिः ।
नास्ति भ्राता न किल सहजा बन्धुरन्यो न कश्चित्
वृद्धा साध्वी किमिह कुरुतां हन्त लोके विशाले ॥

I

तण्डुलविक्रयी—अम्ब, अम्ब, ...

गृहिणी—कस्तत्र ?

तण्डुलविक्रयी—अहं किल तण्डुलविक्रयी ।

गृहिणी—कः समाचारः ? कुत्र आगतोऽसि ?

तण्डुलविक्रयी—स्थानके तण्डुलमूता आगताः सन्ति । वहनवेतनं एकं रूप्यं चतुर्दश आणकाः । न मयि तदास्ति । यदि सौकर्यं यदि इच्छा दत्त । दत्वा तण्डुलमानीय दास्यामि ।

गृहिणी—(गृहिणमुपेत्य) तण्डुलविक्रयी आगतोऽस्ति । स्थानके किल तण्डुलमूता आगताः सन्ति । वहनवेतनं दत्वा किल मूता आनेतव्याः । तदर्थं एकं रूप्यं चतुर्दश आणकानपेक्षते । दत्त । तण्डुला न सन्ति । आनीय दद्यात् ।

गृही—आणका न सन्ति । द्वे रूप्ये ददामि । तस्मै देहि । (ददाति) ।

गृहिणी—तथा । (गृहीत्वा गत्वा) तण्डुलकार, अद्य पक्तुं तण्डुला न सन्ति । तत्र आगमनानन्तरमेव पाक आरब्धव्यः । त्वरितं गत्वा आनय । इदं रूप्यद्वयम् । (ददाति । तण्डुलविक्रयी गृहीत्वा गच्छति ।)

गृहिणी—(चिरं प्रतीक्ष्य गृहिणमुपेत्य) न खलु स आगतः । किं क्रियताम् ?

गृही—स्थानके मूतग्रहणे कदाचिद्विलम्बो भवेत् । मा त्वरिष्ठाः ।

गृहिणी—न । स्थानके द्रष्टुं बालं प्रैपिपम् । न किल स तत्र वर्तते । न वा तण्डुलमूता आगताः सन्ति । मिथ्यावादी सः अस्मान् वञ्चितवानिति भाति ।

गृही—तथा नु । गच्छतु यदि गच्छति । अयं काल ईदृशः । न कोऽपि विश्वसनीयः ।

II

देवदत्तः—अङ्ग जानासि यदद्य प्रातः आर्यस्य गृहे वृत्तम् । साधुस्तपस्वी । सर्वं प्रामाणिकं मन्यते । वृथा रूप्यद्वयं हीनम् ।

यज्ञदत्तः—जानामि तात जानामि । प्रायः सर्वे जनाः सम्प्रति एवं वञ्चनया वृत्तिमिच्छन्ति । तद्वञ्चनागोचरे पतन्तः सर्वपरमार्थग्राहिणश्च केचन तत्र तत्र सन्ति । केन किं क्रियताम् ।

———

॥ श्रीः ॥

# उद्यानपत्रिका ॥

एकविंशवर्ष-

# विषयसूची ॥

## UDYANA PATRIKA

(XXI Year)

## CONTENTS


1 मेनका। 1, 19, 41, 65.

2 सुभाषितनीवी । [पण्डितश्रीनिवासताताचार्यैः] 5, 23, 45, 69.

3 भाषा 9.

4 परिपन्थिशब्दः। [V. R. S. Tatacharya Siromani] 12, 33.

5 भास्करप्रणामः। [नारायणभट्टः।] 14.

6 शेक्स्पियर्-कृतं यथाभिमतम्। (नाटकम्) 15, 35, 55, 77.

7 पाठशुद्धिविमर्शः। [T. E. Viraraghavacharya Siromani] 18.

8 महद्दैवतम्। 27.

9 रक्ष कृपालो। [नारायणभट्टः] 37.

10 सरससंवादः। [T. E. Viraraghavacharya Siromani] 38.

[प्रतिबोधनम्।] in the wrapper.

11 गुणशिक्षा । 49.
12 समासे भवतीशब्दः । [V. R. S. Tatacharya Siromani] 52.
13 गैर्वाण्यां गद्यकाव्यम् । [U. Venkatakrishna Rao] 58
14 मङ्गलक्षणम् । [T. Venkatacharya B. O. L] 63.
15 पुस्तकपरामर्शः । 64.
16 संस्कृतम् । 73.
17 केचन विशेषाः । [V.R.S. Tatacharya Siromani] 74
18 पूर्णत्वसंवादः । [T. E. Viraraghacharya Siromani] 81.
19 नाटककथासारः (शाकुन्तलम्) [T. Venkatacharya B. O. L.] 84.
20 विद्वत्सु विज्ञापनीयम् । 88.
21 विद्वान् महाराजः । 89.
22 गोश्रीमहाराजाः । [D. Damodara Pisharadi] 90.
23 पुस्तकपरामर्शः । [Uttamoor T. Viraraghavacharya] 91.
24 नारायणः । [नारायणभट्टः] 93.
25 विषयसूची । 95.

---

शास्त्रानुबन्धः ।

कुवलयानन्दः । (बुधरञ्जनीसमेतः) [221–252]

---